नं० ४८०३

नाम - जलाशयोत्सर्गविधिः

कर्ता - नारायणभट्ट० रामेश्वर पुत्र०

पत्र ८२ पत्राणि सं. १९४४

विषय: धर्मशास्त्रम्

जलाशयोत्सर्गविधिः

४८०३

43-D.

॥ ऋग्वेदिनारायणभट्टप्रणीताजलाध्यायोत्सर्गपद्धतिः प॰ ८२ श्लो॰ १७२२

नउ॰
प॰
१

ॐ श्रीगणेशायनमः सरस्वतीनमस्तामः प्रत्यूहव्यूहहानये यस्यैकदन्तानविघ्नानांविघ्नेसवि
निरुन्तमा १ विघ्नाधिपनमस्तुभ्यंविघ्नसंघविघातय प्रवर्धयस्वयात्मुखेबुद्धिसुद्धिविधेहिच २ उन्नि
द्रपत्रशतपत्रसगोत्रनेत्रंसुग्रीवमित्रमतिचित्रचरित्रपात्रं उन्नीलनीलमणिवर्णसुवर्णगात्रं
रामंभजेकुलपतिंकमलाकलत्रं ३ विश्वामित्रकुलोदयोविधुरिवाखंडःकलानांनिधिर्वाग्गु
फेनिखिलायिपस्यवस्तुयाशिष्यप्रशिष्यैःश्रिता विद्यापद्मविकासनैकतरणिः श्रीमहेशा
विंदजः सख्यावद्भुणनाम्नणीविजयतेश्रीमहरामेश्वरः ४ शास्त्राण्यधीतीपितरेवयः श्रुतीः
स्मृतीःसमालोक्यवदेशरीतीः नारायणस्तन्नयोऽविमृश्यजलाशयोन्तर्गोविविधविधत्ते ५
यद्यपीहबहुधीर्वीनाग्रंथाःसंतिपूर्वःशाताःतथापीहंविशेषोयः पंडितैःसविविच्यताम् ६

तत्रादौ तडिद्युन्नायिकाश्रुते तद्विधौ तत्कार्यं प्रहृत्तं तं काजलाशयप्रशंसा यमः कूपारामप्रपाकारी तथा हृद्धावरोपकः कन्याप्रदः सेतुकारी स्वर्गं प्राप्नोत्यसंशयं तडागे यस्य पानीये सन्ततं खलु तिष्ठ न्ति स्वर्गलोके गतिस्तस्य नात्र कार्या विचारणा येषां तडागानि बहूनि सन्ति प्रपाश्च आरामकूपाश्च प्रतिश्र याश्च अन्नप्रदानं मधुरा च वाणी तेषामयं वै वपरश्च लोकः नंदिपुराणे यो वापीमथवा कूपं देशे तोयविवर्जिते खानयेत् स नरो याति स्वर्गे प्रेत्य शतं समाः देवैरेकत्र मत्तल तस्मात् द्विजि तस्य या तडागकर्ता लभते स्वर्गं युगावत्तं हृयं यत्र विप्रा यमुगौरेकाश्चीयते सलिलं क्वचित् तडागं ताद्द शं कृत्वा स्वर्गं दशयुगान्वसेत् यो वापीमग्निसाक्ष्ये ण विधिवत्प्रतिपादयेत् कोणाद्दकुम्भस्या नन्तस्य दानं चैव भक्तितः सहस्रयावतं तेन तेन दत्ता महीभवेत् तत्सान्निध्यो द्विजा न चैव विपिवत्सा

नभोजनैः स यातिवारुणं लोकं दिव्यकामसमन्विते वाप्यालीरेतयः कुर्यात्सच्छायं तरुपुत्रकं नरु
तडा॰ पु॰ २ दानाच्छतगुणं वापीदानाच्छतगुणं संयोगदानेन फलं लभते पुरुषः सर्वे पीयत इति स्कांदसं
पिवतीत्यर्थः वतरः समुद्धानित्यन्वयः वाप्यालीरइति केवलतरुदानाद्दशगुणं केवलवापी
दानाच्छतगुणं समुदितदानफलमित्यर्थः स्कंदपुराणे अवटं यो नरः कुर्याद्यांपूर्णं सुशोभनं
दिया ब्राह्मणेभ्यस्संपूजयित्वा यथाविधि आष्टभिः सविचित्राभिः पताकाभिरलंकृतं पितृंस्ता
रयते पश्चात्तं दत्वा स नरोत्तमः यात्यसौ परः स्वर्गीतेन वरुणस्य सलोकतां अवटं कूपं विस्तुधर्मो
त्तरे उदकेन विना तृप्तिर्नास्ति लोकेद्वयेसदा तस्माज्जलाशयाः कार्याः पुरुषेण विपश्चिता
अग्निष्टोमसमः कूपः सोश्वमेधसमो मतः कूपः प्रवृत्तपानीयः सर्वं हरति दुःकृतं कूपकृ

त्स्वर्गमासाद्य सर्वान्भोगानुपाश्नुते तत्रापि भागवैपुल्यं तु एषस्थानात्मकीर्तितं तथा यम
लोकं न पश्यन्ति जलाशयकारिणः अतः कुर्यात्प्रयत्नेन सद्भूयं भूपकूपकं दशाकूपसमावापीत
यावपरिकीर्तिता आदित्यपुराणे सत्त्वं यरतायेवतीर्थशौचरताश्चये तडागकूपकर्तारोस्तु
येनैव तृषाभयात् कूपारामतडागेषु देवतायतनेषु च पुनःसंस्कारकर्ता च लभते मौलिकं
फलं तीर्थशौचमलकर्दमादिदूरीकरणं मौलिकं प्रायकरणं जातं महाभारते देवामनु
ष्याः पितरो गंधर्वोरगराक्षसाः स्थावराणि च भूतानि संश्रयंति जलाशयं कुलं संतारयेत्सर्वं
यस्य खाते जलाशये गावः पिबंति सलिलं स्नायंति च नराः सदा तडागे यस्य गावस्तु पिबंति तृ
षिता जलं मृगपक्षिमनुष्याश्च सोश्वमेधफलं लभेत् यत्पिबंति जले तत्र स्नायंते विश्रमंति च

तडा॰
प॰
२

तडागदस्य तत्सर्वं प्रेत्यानंत्याय कल्पते तथा वर्षाकाले तडागे तु सलिलं यस्य तिष्ठति अग्निहो
त्रफलं तस्येत्येवमाहुर्मनीषिणः वसंतकाले पानीयं तडागे यस्य तिष्ठति अतिरात्रस्य यत्तस्य
स फलं समवाप्नुते निदाघकाले पानीयं तडागे यस्य तिष्ठति वाजपेयसमं तस्य फलं महर्ष
यो विदुः लिंगपुराणे तस्मात्कूपाश्च वाप्यश्च तडागानि प्रपास्तथा कर्तव्यानि यथाशक्त्या न
रैरात्महितैषिभिः भविष्योत्तरे सर्वस्वेनापि कौंतेय भूमिष्ठमुदकं कुरु कुलानि तारयेत्क
र्ता यत्र गौर्वितृषा भवेत् अतः शुभागते द्रव्ये तडागादिषु योजयेत् धर्मः सपंथा विलेयस्तडा
गे बहलमंडिते पीतातोयं च मार्गस्था विश्रमंति रमंति च वृद्धपराशरः संनिहत्य तडागानि शु
ष्कारिण्यश्च दीर्घिकाः तथा कूपाश्च वाप्यश्च कर्तव्या गृहमेधिभिः विष्णुः अथ कूपकर्तव्यत्वम्

हृतेपानीयेउद्धृतंहि विनश्यति तडागकूपान्वितस्तमोवारुणंलोकमश्नुते जलप्रदःसदातृप्तोभवति तत्पट
नेतस्मात्कूपात्प्रहृते विस्तयमोंत्तरे पानीयशोषनेकृताह्देदेवविनिर्मिते पुरुषःफलमाप्नोति दशगो
दानजंद्विजाः दारुपाषाणरचितंसर्वेषांजलाशयं पुराणेमानवःकृत्वादेवलोकेमहीयते पुराणे
करणात्तत्रत्पभिमाप्नोत्यनुत्तमो तथा सर्वाङ्गवातंयःकुर्यात्तडागमतिमान्नरः तत्फलंनाप्नुयात्क
र्मोराजसूयाश्वमेधयोः परःस्वपुण्यंयःकुर्यात्किंचित्तस्यजलाशय पुण्यांशभागीभवतिसोपियस्य
जलाशयः प्राप्नोतितृप्तिंपरमांमनुष्येलोके तथाग्राम्यात्सलिलापियस्यगजला शयेस्वल्पमपिकृते
द्विजेन्द्रास्तस्मात्तुकार्यंसलिलंतुलोके इतिनारायणभट्टकृतेजलाशयोत्सर्गविधौजलाशय
प्रशंसा अथजलाशयदेशः तत्रभूमिविशेषेणजलस्थिरामससेयत्रयोनिश्चायकविह्वाभिवराह नि

ग्रे॰मा॰ ४३ ५

संहितायां जेषानि बहुलानुनेहोक्तं ते रूपेसामान्यतो देशोभविष्यान्तरे भोगपस्यानेकतः रू
पेसुखाडमालिलस्तथा ह्यछेरजुसमायुक्तः पुनात्यासममेकुले दिविशेषउक्तो वराहसंहि
तायां आग्नेयदिकोणे यामस्य पुरेस्यवा भवति रूपः पदिनिमेसकं रोतिभयं दारुवसमान्
षमायः नैरृतकोणे वालदायं ववनितालयं ववायवे दिकवयमेनन्यकाशेषासुहितावहः
रूपः रहादोरूपकरणादि विशेषउक्तं ते मत्स्यदेवीपुराणे एवंमात्रित्यकर्मवं नस्यानरय·
येपिवा न एवं यमयं कुर्यान्मटादेवालयान्हृहान् हृतं भयप्रदं लोके तथा वाग्निभयं जल
वायवेवापि देवस्य भयदं जायते कृतं वराहमिहिरः पुहिंसूतिष्वत्रहानिपुरे अथीनाशमृत्यु
संपदं शास्त्रवायो किंचित्सौख्यादिद्वत्र एवादिकूपोत्कूपो मध्ये गेहमध्ये दायं वनडागदेशाव ८

शेषोभविष्यन्तरे तडागेनगरोपान्ते यस्य स किल जायते उभयोरर्थसंसिद्धिर्ईष्टाकर्मजनस्य व
विस्तुयमीमिते कृतान्तडागेवनथावाहणं लोकमश्नुते दशवर्षसहस्राणि नल्वमात्रेहिजोनम
ततोपि पुण्यमाप्नोति स्थानाभ्यासान्तथावङ्ग गवांप्रचारेतत्कृत्वागोलोकं प्राप्नुयाध्रुवं शुक्र
लोकमवाप्नोति तडागकरणात्सुधीमादि नल्वेना दिसपुराणे षट्नवत्यंगुलैश्चैव यत्तु दंडश्च
कीर्तितः पञ्चषोंत्रिंशतानल्वमाहुः संख्याविदोजनाश्रमके अथ कूपादिपरिमाणं गर्गः
कुर्यातेवकराहूर्ध्वं पंचविंशकरावपि कूपंहमायतंप्राप्तः सर्वभूतायतंप्राप्तः सर्वभूतसुखा
वहे देवीपुराणे कूपः पंचकराहूर्ध्वं दशवर्गोत्रयोन्नमेः कर्तव्यासर्वतोद्वारादिविंशकपथ्या
थवा विस्तामंभङ्केवाप्येहस्मावाद्वयथातथा अस्तावावाहदेवशावाधन्तेश्चकसमाकृतिः क

ना.उ. नैवाङ्गवसारेणगोपथासर्वकामदा वेदाष्टमध्यगोत्साराकरमाहींयथाभवेत् कूपोवाशिलमेहीवा
५ देयानेमायथाटव्या भवनेकाष्टपाषाणैर्हृषपीठसमञ्छ्रया सुवह्नातोरणोपेताणानावृष्टहाविव
5 ता नागयक्षगृहैर्देवाभूषिताकीडिताकुला वापीभद्रासुरैश्रेष्ठसर्वकामप्रदानृणां भद्रापद्मा
शुभाकीर्ताविजयामंगलातथा जयायाकी भवेद्वापीनृपादीनांशुभावहा हस्तापनावतरस्या
वाप्यः साधारणामताः शेषाः काम्याधिकारेण कूपोहस्तः सुखावहइति वर्गः कृतिः तउ
उववेचकरोद्धृतावेर्गोपावमावत् पंचविंशतिकरावधीत्यर्थः वापीति वत्तुहेस्तोदंड स्तदा
दशवर्गादशगुणादंडावधिपताविंशहस्तपर्यन्तमित्यर्थः इंदेवायामतोनवदैर्घ्यफलो
नैतेके धयेस्तविंशत्यधिकशतहस्तात्मक एवोक्तनैल्वेपरिमितनडागेनवाप्याः संकराय ५

नेः कूपेवाप्योहस्तकेमानेक्षेत्रफलंतत्रवेधाङ्गः नत्रसमलंबकवत्तवस्तेव्यस्तदेवेमायनेकरणम्
भूवदनसमासार्द्धमध्यमलंबेनसंगुणपदितिवत्तवस्तेव्यासार्द्धवर्गवर्गात् क्षेत्रफलंदशगुणात्म
लमितिविवर्त्तले श्रीधराचार्यकिरीत्यादेक्षेत्रफलानयनेक्षेयं क्षेत्रफलनेंविस्तारपदेवर्तुलक्षप
करणार्थमिहहस्तापतेसमेवत्तवस्तेमंडलेविकीर्षन्मध्यादेसनिपात्यपार्श्वतः परिलिखेतंत्रेः
यदतिरिक्तंभवतितस्यातृतीयेनसहमंडलेपरिलिखेदितिकात्यायनोक्तरीत्यावर्तुलंप्रसाध्यख
नेदिति इतिकूपादिपरिमाणं अथप्रकीर्णकं वराहसंहितायां वापीप्रागपरायतावसुवि
वेधनेनयाम्योनराकल्लोलेस्वदारमेतिमहतामाप्रायेशः अरिनैः नावेदिक्षात्तिसारदारुभिरपा
संतमावारयेत्पाषाणादिभिरववाप्रतिवयेत्ककोद्दिपाश्वादिभिः १ ककुभवटाश्वत्थकदं

वैः सनिचुलंदंतुवेतसनीपैः कुरवकतोलाशोकमधूकैर्वकुलविमिश्रैश्छाद्यन्तेतीरंरक्षार्थं
ना॰ड॰ वनैर्वाहिकमेवदेशेकार्यंशिलोसंचितवारिमार्गे कोणस्थितेनिर्विवरंकपाटंकृत्वाततः पा
८ सुभिराववपेत्तत् २ अंजनमुस्तोशीरैः सराजकोशातकामलकचूर्णैः कतकफलसमायु
क्तैर्योगः कूपेप्रदातव्यः ४ कलुषंकटुकंलवणंविरसंसलिलंयदिवाशुभगंधिभवेत् त
दनेनभवेत्यमलंसुरसंसुसुगंधिगुणैरपरैश्चयुतं ५ तथा प्रांतच्छायाविनिर्मुक्ता नमा
नोज्ञाजलाशयाः यस्मादतोजलप्रांतेपादपान्विनिवेशयेत् अथजलाशयारंभकालः
सर्वविधिनिषेधाभ्यांज्ञेयः तत्रविधिदीपिकायां पुष्योमैत्रकरोत्तराःसवरुणश्चसेन्दु
पित्र्येंदुभैःशस्तैःकेंद्रभवारयोगतिथ्येशुक्रेस्ववीर्येवुध षष्ठेदौजलराशिगेदशम ६

गेषु लग्नेषु भांशोदयेष्वारंभः सलिलाशयस्य शुभदो जीवेन्दुशुक्रोदये संयनिखा स्रद्धोद्वये स्वा
त्यश्विषु शुभ्रहस्तेषु सर्वदा वसुनर्वैसौ रेवत्यां वारुणे चैव वापीकर्म प्रशस्यते वाराहसंहितायां
हस्तो मघानुराधा पुष्य धनिष्ठोत्तरारोहिण्यः शतभिषगित्यारंभे कूपानां शस्यते भगणः
विरुद्धमोत्तरे स्थिरे लग्ने स्थिरांशे वक्रकंडेश्चोपचयान्विते तथा यस्य सौम्यग्रहाः केंद्रत्रिको
णे वापि भार्गवः पापश्चोपचयस्थाने तस्मिन्कार्ये निवेशनमिति शुक्रो मंक्षु प्रासादे चैव मेवस्यात्क
पवापीषु चैव हीति केंद्रं प्रथमं चतुर्थं सप्तमं दशमानि त्रिकोणं नवपंचममेव त्रिषडेकादश
मानुपचयस्थानानि श्रवणगाहृतसंतरोपणेपि वराहसंहितायां ध्रुवमृडमूलविशाखा गुरु
रुभं श्रवणं तथाश्विनी हस्तं शस्तानि दिव्यदृग्भिः पादपसंरोपणे भानि ग्रथ्यजलाशयोत्त

ता॰ ८

गेकालः तत्रतस्मिन्सलिलेसंपूर्णेकार्त्तिकेचविशेषतः तडागस्यविधिःकार्यः स्थिरनक्षत्रयोग
तः मुनयः केचिदिच्छंतिपुनीतेचोत्तरायणे नकालानियमस्तत्रसलिलंतत्रकारणमितिभवि
ष्योत्तरेणकेजलसमुत्पाद्यायामेनयथासंभवकालशोधनेकार्यं दीपिकायां मार्गेडहडुशुद्धौमुर
जिदृशायनेमाघषट्कसंशुद्धे मूलापाढोत्तराश्विश्रवणागुरुकरेपौस्णप्राजोजवेद्दे मैत्रेन्द्रास्त्रवसू
णे १५।१२।१५ मदन १३ रवि १२ तिथौमहितीयातृतीयाकायांतोयप्रतिष्ठास्तगुरुसितदिने
कालशुद्धौसुलग्ने अपरोपिकालविधिर्जलाशयारंभोत्सर्गयोः कालनिषेधश्चसामान्यतो
विशेषतश्चपुराणेपिहिविप्रकथितइतिमत्स्यपुराणे श्लोकव्याख्यानावसरेवक्ष्यतेसततोज्ञेयः लु
प्तसेवनस्तरोत्पातादिनिषेधस्तुग्रंथांतरेभ्योज्ञेयः प्रतिविस्तरापत्तेर्नेहलिख्यते इतिरामेश्वरभट

स्तु नारायणभट्टकृते जलाशयाद्युत्सर्गविधौ जलाशयदेशतत्परिमाणारंभोत्सर्गकालनिरूपणे
ग्रथकृतजलाशयस्य तदुत्सर्गकरणावश्यकताभविष्योत्तरे उत्सर्गविधिमकृत्वा यो न कारयते
शांतिं वापीकूपादिके विमोनस्य तन्निष्फलं सर्वं मन्मेंवीजमिवोषरे तद्वाप्यादि उत्सर्गेव फलस
केनैव यो न शास्त्रप्रसादेन विधिवत्प्रतिपादयेत् सयाति वारुणं लोकं दिव्यकामसमन्वितं फ
लोक्तराण्यपि प्रातिस्विकानि निर्वहवनेतानेवानि याबायेणोत्सर्गविधानेन स्वयजमानस्व
दोषउक्तस्तत्रैव विधिहीनतकर्मवे ब्राह्मणेन यथाविधि कर्ताकारयिताचैव उभौ तौ स्वर्गगामि
८ नौ विधिहीनमाज्ञानानोय कुर्याद्दर्थमोहितः कर्त्ताकारयिताचोभौ स्यातां नरकगामिनौ अनु
पु३ त्सृष्टजलाशयजलपानस्नानादौ दोषउक्तो भविष्योत्तरे वापीकूपतडागेषु स्थितं तु प्रथमं जले

ना॰इ॰ ८

अपेयंतद्भवेत्सर्वंतज्जलेस्नानिकास्वपि तथाप्यत्र सदाजलेपवित्रेस्यादपवित्रमसंस्कृते कुशाग्रे
णापिराजेंद्र नस्पृष्टंचमसंस्कृते तस्मात्सर्वप्रयत्नेनकुर्यात्संस्कारमत्रमे तथा वापीकूपतडागा
दीयजलेस्यादसंस्कृते अपेयंतद्भवेत्सर्वंपीतावाचांद्रायणंचरेत् ब्रह्मांडपुराणे यत्रसर्वोपयो
त्सृष्टंयत्राभोज्यनिपानजं तद्ज्येसलिलेनातसदैवपितृकर्मणि दोषातिशयार्थः पितृक
र्मणिपुनर्निषेधः मनुः परकीयनिपानेषुस्नायान्नैवकथंचन निपानकर्तुः स्नात्वाहि दुष्कृ
तांशेनलिप्यते पानशय्यासनान्यस्यकूपोद्यानगृहाणि च अदत्तान्युपभुंजानएनसः स्या
त्तुरीयभाक् नदीषुदेवखातेषुतडागेषुसरःसु च स्नानंसमाचरेन्नित्यंगर्त्तप्रस्रवणेषु चेति
निपानेजलाशयः तस्यचपरकीयत्वंपरसेवोपितेनत्वात्मसत्तानास्पदीभूतत्वं अदत्तानीति ८

निंदायामनुवादात् तथा वा प्रतिष्ठितमेव निषेधविषयः एवं च स्वविक्रीते दत्ते वा प्रकारेण पादाव
प्रतिष्ठिते सर्वमर्त्तुरपि तदानत्वं स्वभावात्स्नानानधिकारं इति परकृतान्सन्तन्नकूपांश्च वर्जयेदि
ति बौधायनीयानिषेधोप्यनुत्सृष्टविषय एव निपिंडोद्धारोप्येवेति मन्वर्थमुक्तावलीमिता
क्षराकारावप्येवमेवाहतुः लक्ष्मीधरस्तु लेपाणि हरनाप्यादयस्तु परकृतानीति बौधायनपै
ठीनस्यकेनिपानकर्तृँड कृतो शौनेस्यनुवाददर्शनाच्च परकीयपरवारीत्यादौ परकं तद्केव
मात्रतात्पर्यपर्यवसायिताया: प्रतिष्ठिताप्रतिष्ठितनिर्विशेषमेव स्नानादिनिषेधश्चाह:
तद्विषये वक्ष्यमाणशिष्टत्रयतदाचारविरोधात् प्रद्मानीतिवानुमत्स्यभावविषयतां विवक्षिता
बौधायनः सर्वतोषधिनिहृढास्तत्रयोवर्णाद्विजातयः प्रातरुत्थायकुर्वीरन्देवर्षिपितृ

ताउ
९

नर्पणं निरूढाख्यनक्रुवीगवनेशभाकृतस्य मेत्तकात् नस्मान्वरकृतान्सेत्तन् क्रपोयपरिवर्ज
येत् उहृमेवापित्तन् पिंडानक्रुपादापत्स्तुनोमदा निरूढाख्यत्रीत्यिंशन् क्रपा स्त्रीत्वाघटार
लत्था ख्रनिरूढाववेनिरूढप्रवाहाख्यसेत्तकृतस्ववदंभोनिरोपकृत् सत्तनिति सतवकरहवारि
णिलन्तणपासेत्तशाह्वः उहृतेस्यत्रार्थस्यनिरूढाख्यिसनेनसेवप्यते त्रीत्सिंडास्त्रीत्वाघटा
निनित्व क्रपादिसनेनैवात्विनंतथावक्रुपात्सिंडत्रयमेतुयदेयेचोद्दरणीयमित्यर्थः इतिकेचि
त् यमेत्तहृस्यवापीत्सनेन सामान्यतः क्रपवत्रिरूढाख्यपित्रिपिंडोद्धारप्राप्तौपुनर्निरूढाख्य
त्रीत्सिंडमात्रोद्धारनियमार्थं सवनियमः क्रपत्तल्पन्यायादस्यत्रापिसमपैवपिंडोद्धारासैसम
पंचघटविकल्पार्थं इति याज्ञवल्क्यः पैवपिंडानतुहृतसनस्त्रायात्परवारिषु स्त्रायात्वदीटे

वत्वात हृदयस्त्ववर्णोप्युव अस्यार्थमाह मितादलगाकारः परवाविष्णुरसेवेपिष्णु सर्वसतोदेशो
नात्यक्ते षुतडागादिषु पंच पिंडानुद्धृत्य न स्नायात् अनेनात्मीयोत्सृष्टाभ्यनुज्ञातेषु पिंडोद्ध
रणमेन रेणापि स्नानमभ्यनुज्ञातमिति इदं पंच पिंडोद्धरणं वापीकूपसन्ततिविकल्पान्निमादि
विषयं नेष्टकचितेपि तेन लपयेद्वापीतडागोदपानेषु सप्त पंच त्रीन्वा पिंडानुद्धृत्यपि तेन स्नायं
ये दिति शेषं विकल्पमपिंडोद्धरणं तु वापीकूपतडागविषयमिति कश्चित् इष्टान्सृष्टानुत्सृष्टेज
६ लाशये स्नानादौ कर्त्तव्यविशेषः अथोपयाते जलाशयशुद्धिः तत्र व्यासबृहस्पती भूमिष्ठमु
५।३ दकं मेध्यं वैतृष्ण्यं पवनगोर्भवेत् अव्याप्तं वेदमेध्येन तद्वदेव शिलागते शिरागतमिति पाठः
शिरागतनिर्झरजलनिर्गतमित्यर्थः उशनाः नद्यः कूपतडागानि सरांसि सरितस्तथा असंस्पृष्टा

ताड॰ १

10

स्वदोषाणि मनुः स्वायंभुवोऽब्रवीत् देवलः अविगंधारसोयेनातिनिर्मलाः पृथिवीगताः अक्षीण-
श्चैव गोपानादायः शुद्धिकरास्स्मृताः उद्धृतावाप्रशस्ताः स्युः शुद्धैः पात्रैर्यथाविधि एकरात्रोषिता
स्तास्तु त्यजेदापस्समुद्धृताः नाडनिः सर्वनाम्नाप्रकृतागोतृप्तिमात्रपयोभाअल्पास्वापः परामृश्य
ने अतो बहूदकात्तडागादेरुद्धृता नो वाऽदूषिता नो न दोषः तडागादेरुद्धृताश्चाल्पापो रात्र्युषितोद
कोनरस्तेभवेत्शुद्धा एवेति मदनपारिजाते तथा अस्तोभ्याणि तडागानि नदीवापीसरांसि च
वेडालाद्यस्पृष्टिस्पर्शैर्तीर्थतः परिवर्जयेत् तीर्थमुदकावतरणमार्गस्तत्र वेडालाद्यवतरस्तु
लक्षणार्थः हारीतः वापीकूपतडागेषु मानुषे शीर्यते यदि अस्थिचर्मविनिर्मुक्तैर्दूषिते वा शुनादि
भिः उद्धृत्य तज्जलं सर्वं शोषणेन परिवर्जयेत् अस्थिचर्मविनिर्मुक्तैश्चिरकालवासेन विशीर्णैः ह १०

हस्पतिः मृतेपंचनखात्कूपादत्यंतोपहतात्तथा अपः समुद्धरेत्सर्वाः शेषंवस्त्रेणशोधयेत् वह्निंप्र
ज्वालनेकृत्वाकूपेपंचकोष्ठकान्विते पंचगव्यंन्यसेत्तस्मात्नवतोयसमुद्भवे देवलः उद्धरेदुदकंसर्वंपंच
पिंडान्मृदस्तथा शविरकालोपयोगेस्वल्पोपयोगेतुहारीतः घटानांशतमुद्धृत्यपंचगव्याद्विपेन
तः श्वभिः श्वपाकैर्वाडालैर्दूषितेषुविशोधनं आपस्तंवः उपानच्चर्मविण्मूत्रस्त्रीरजोमद्यमेव
वा एभिर्विदूषितेकूपेकुंभानांषष्टिमुद्धरेत् विष्णुः जलाशयेष्वथाल्पेषुस्थावरेषुमहीतले
कूपवत्कथिताशुद्धिर्महत्सुतुनदूषणं स्थावरेषुप्रवाहरहितेषु यमः चंडालभांडसंस्पृष्टंपी
त्वाकूपगतंजलं गोमूत्रयावकाहारस्त्रिरात्रेणैवशुध्यति तथा नदीवेगेनशुध्यति कश्यपः
रतीनांरजनेशुद्धिः रात्रिश्चर्मकोशः रजनंकाषायद्रव्येणशोधनं यमः प्रपास्वरण्येघटगोय

कूपे द्रोणपां जलं कोष्ठगतानाल्पत्वापः कूपेपि मूत्राद्यदर्षे यमाहराप उद्धृतः कोदितवान्ति वेवतृ
ना३· श्रस्यार्थः यद्यपि मूत्रादिनिरिक्तविण्मादिवर्णेसे वैपिल्लपादितप्यापितत्रूतेज़ल यमार्थेदीयमा
१२ नमनापिदिनयेयं आपदितपेयंयमरणपगतैप्रपादिभवति द्रोणोत्रश्माहिमयीजलपात्री
सर्वसाधारणी कोशोद्धृतिः तथा अजागावोमहिष्यश्च ब्राह्मणी च प्रसूतिका दशरात्रेण शु
ध्यंति भूमिष्ठं च नवोदकं याज्ञवल्क्यः शुचि गोतृप्तिकृत्तोयं प्रकृतिस्थं महीगतं प्रकृतिस्थ
रूपरसगंधस्पर्शेनरमनापन्नं महीगतमित्यस्य शुद्धभूमिगतस्य शुद्धिमात्रे निहतार्थं न तत्रैतद्वि
शेषोदकस्य शुद्धतयाहृत्यर्थानाप्युद्धृतस्य उद्धृतास्वेति प्राग्युक्तदेवलवचनादिति विज्ञानेश्वरः हे
मात्रिद्रोणपराशरः वापीकूपतडागेभ्यश्चापोग्राह्यास्तु सर्वशः पश्चात्तत्रैव पदमेव्यतपंक्त्यावेन शु १२

ध्यति अस्थिचर्मावसिक्तेन श्वयाजोत्थैश्च मूत्रकैः दूषिते तद्भवेत्तोयं यथायस्योत्सन्नशोषणं अस्थि
चर्मावपतिते खरश्वानरसुत्कैरैः उद्धृतैरुदकैस्सर्वे शोधयेत्परिमार्जनैः वापीकूपतडागेषु दूषितेषु क
थं चन उद्धृत्यैव कुम्भशतं पञ्चगव्येन शुध्यति खनिकूपतडागेषु सरित्सु विशेषतः नेभ्योहृत्वा
घटशतं पञ्चगव्येन शुध्यति पादुकोपानहादीनां मूत्रं कूपे पदि निमज्जति बहिःकुम्भान्समुद्धृत्य पञ्च
गव्येन शुध्यति दूषिते च मलैः क्लिन्ने पचेद्विणानुलेपिते अद्भिः शुध्यति तत्सर्वमपोह्य शुध्यति तत्स
६६ द्भिः कथं भवेत् गवां मूत्रपुरीषेणा सोमसूर्याग्निरश्मिभिः मारुतस्य च वेगेन आपः शुद्धिमवाप्नु
५१३ यः अत्रस्रवत्यपेमारेपनिष्कर्षैः वापीकूपतडागादिष्वल्पजलेषु श्मामानोरादिशवेषु क्लिन्ने जीर्णे
सति तज्जले सर्वं समुद्धृत्य मृत्तिकोपरि तत्तोद्धृत्य पञ्चगव्यप्रोक्षणाच्छुद्धिः पाषाणैरिष्टकाभिर्वा च

ना॰उ॰
१२

द्वेनन्त्वाग्रस्यापेदहने दारुवद्देप्रक्षालनमेव वहुजलषष्टिकुंभोद्धारः मूषकादिक्षुद्रप्राणिपाते
त्रिंशत्कुंभोद्धारो गोमनुष्यादिमहापश्व जलेजलेप्राणिपावेनदोषः वापीकूपजलेनरपावेस्थितेष
ट्शतजलमुद्धृत्यपंचगव्यप्रक्षेपाच्छुद्धिः तत्रजलेनरमरणेजलस्यत्रिरात्रमाशौचं स्वाशौचांते प्र
वीक्ष्यशुद्धिःकार्या वापीकूपजलेउपानत्कुक्षिमविण्मूत्रंपतनरक्तेवस्नामज्जास्थिदूषितेषष्टिकुं
भजलोद्धाराच्छुद्धिः जलबाहुल्येशतकुंभोद्धारात्पंचगव्यप्रोक्षणाच्चशुद्धिः कूपादिजलेः शु
द्धिवज्रसाहृषितेदिवासूर्यरश्मिवायुस्पर्शनाच्छुद्धिः रात्रौवाशुचेऽर्कनक्षत्ररश्मिवायुस्पर्शेना
च्छुद्धिः संध्यायांवाउभयस्पर्शाच्छुद्धिः नदीस्रोतस्तडागजलेऽन्त्यजैर्दूषितेतन्स्वीकृतजलस्याना
दन्यत्रजलेशुद्धमेवेति एवंविचार्यतडागाद्युपपातेशुद्धिःकार्या इतिनारायणभट्टकृतेजला १२

१८

प्रायेणसर्गेविधौनदुष्यतिसूद्धिः अथशवादिसंस्पृष्टकूपादिजलपानेप्रायश्चित्तंप्रसंगात् त
त्रविष्णुः मृतेपंचनखात्कूपादत्यंतोपहताद्वोदकंपीत्वाब्राह्मणस्त्र्यहमुपवसेद्व्यहंराजन्यएक
काहंवैश्यः शूद्रोनक्तंसर्वेषांतेपंचगव्यंपिबेयुः अत्यंतोपहतामूत्रपुरीषादिभिः कामतोमा
त्रपशवोपहतकूपादिजलपाने हारीतः क्लिन्नेभिन्नेशवेतोयंतत्रस्थंयदितत्पिबेत् शुध्यै
चांद्रायणंकुर्यात्तप्तकृच्छ्रमथापिवा अशक्तेनमहत्कृच्छ्रमितिधर्मप्रदीपः यदिकश्चिन्मृतःस्ना
१८ पात्प्रमादेनद्विजोत्तमः जपंस्त्रिषवणस्नायीअहोरात्रेणशुध्यति अकामतोदेवलोके क्लि
धा३· न्नेभिन्नेशवेचैवकूपस्थंयदिदृश्यते पयःपिबेत्त्रिरात्रेणमानुषेद्विगुणंस्मृतं अंगिराः कूपे
विण्मूत्रसंसृष्टेपीत्वातोयंद्विजोत्तमः त्रिरात्रेणविशुध्येतकुंभेसांतपनंस्मृतं स्नानेतुलघु

नाउ
१३
13

विप्रः प्राप्नोति मन्त्रपुरीषाद्यैर्दूषिताः प्राशयेद्यदा तदा सांतपनं कार्यं अनेकायविशुद्धये चंडाल
कूपादिजलपाने प्रायश्चित्तं वः वैडालकूपभांडस्थं नरः कामाज्जलं पिबेत् प्रायश्चित्तं कथं तत्र
वर्णे वर्णे विनिर्दिशेत् चरेत्सांतपनं विप्रः प्राजापत्यं तु भूमिपः तदर्द्धं तु चरेद्वैश्यः शूद्रे पादं वि
निर्दिशेत् तथा म्लेच्छादीनां जलपीतापुष्करिण्यां ह्रदे पिवा जानुप्रमाणं च विशेष्यमपल्लादशु
विस्मरते तत्प्रायेयः पिवेद्विप्रः कामेनाकामतोपिवा शूद्रकामात्वकभोजीस्याद्दाहोरोगेन का
मतः शूद्रेवाभ्यासप्राजापत्यम् श्वेत्त्यजैः खानिताः कूपाल्लडागोवाप्यप्यवव यब्रुस्नात्वावपी
तावप्राजापत्येन शुध्यतीत्यापस्तंबस्मरणात् यत्तु श्वत्यजैः खानिताः कूपास्तडागादितथै
वव तेषुस्नात्वावपीत्वाव पंचगव्येन शुध्यतीति तदशक्तावबृहत्तानेवा शातातपः शूद्रैरपिकः १३

तेकूपेसतेवाप्यादिकेनया तत्रस्नानावपीनावप्रायश्चित्तेनविपते इदमन्यतायद्विषयमिति
शूलपाणिः ब्राह्मणःक्षत्रियोवैश्यःशूद्रश्चेवाप्यज्ञानतः येभिर्योकारिताः कूपाः स्नानेनेशुद्धे
कारयेत् अन्त्यजातयोमूढावासिकायाश्चनुलोमाः अन्त्यावानिनचंडालपरिगृहीतकूपादिजल
पानेगिराः चंडालपरिगृहीतेयोस्नात्वानाडुदकंपिवेत् तस्यशुद्धिंविजानीयात्प्राजापत्येननित्य
शः एतदभ्यासे यत्नापस्तंवेनपंचगव्यप्राशनमात्रमुक्तं यथास्वरात्पंचटकेवसौरेंद्रोणपाजले
अ कोशविनिसृतेव स्वपाकचांडालपरिग्रहेषुपीताजलंपंचगव्येनशुध्यतीति तदशक्तविषयमाप
प्रा३ द्विषयंवा अथप्रसंगान्नडागादिविक्रयप्रायश्चित्तं तत्रदेवस्पहप्रतिश्रयोपानारामसभाप्रपातडाग
उएपसेतत्सन्नविक्रये कृतानमकृच्छ्रमाचरेदितिशातातपवचनमकामापद्विषयं यत्तुपैठीनसु

ना० २८

15

क्रे आरामतडागोदपानपुष्करिणीसुकृतस्य नविक्रये त्रिषवणः स्नाप्यधःशायी वत्सरेणैका
लाहारो दशसहस्रं जपेत्संवत्सरेण पूतो भवतीति तदनापदि कामतो विक्रये दशसहस्रं
गायत्र्याः अथैवं विक्रयानन्तरं जलाशयस्याः उत्सृष्टस्य तत्सर्वसतो देशेन त्यक्ततादृशा
धारणेन स्वत्वाभावाद्विक्रयासंभव एव सर्वानुमते श्च कर्तुमशक्यत्वान्न साधारणस्वा
मिकत्वस्य त्यागपरत्वादिकं अथ वाप्यादिभेदने प्रायश्चित्तं तत्र कश्यपः वापीकूपाराम
सेतुसभातडागवप्रदेवतायतनभेदने प्रायश्चित्तं ब्राह्मणेभ्यो निवेदयेत स कृच्छ्रातिकृच्छ्रं
यादिदं विष्णुरिति प्रथमो मा नस्तोक इति द्वितीयो विष्णोः कर्माणीति तृतीयो पादोस्या
निवर्तयेद्यो यो देवतामुत्सादयति तेन सैव देवतायै ब्राह्मणान्भोजयेदिति अदेवाप्यादिषु सह

२८

दन्योपघाते अभ्यासे महोपघाते च प्राजापत्यादिकमूह्यमिति शूलपाणिः अत्र च भयोद्धारो
पिकार्थः अत एव शङ्खलिखितौ प्रतिमारामकूपशक्रध्वजसेतुनिपानभङ्गेषु तत्समुत्था
नं प्रतिसंस्कारोऽष्टशतं च निपातितानामिति तत्समुत्थानं भग्नप्रतिक्रिया प्रतिसंस्कारः पु
नः प्रतिष्ठासंस्कारः अष्टशतपणपरिमाणो दण्डश्चोभयत्रापीत्यर्थः अत्र यथमोक्ष्यत्वानितक
पादौ गवादेः पातेन मरणे त्वानपितदोषाभावः तत्रपाराशरीयं शक्तस्य कूपे त्वानेव यमो
पैः दृढदाहे च याम्पता ग्रामदाहे तथा घोरे माया प्रायश्चित्तं न विद्यते येति प्राणिमात्रोपलक्षणं
वीतं चाविवादिते त्वननेविधिसृष्टेन मरणायनुकूलव्यापारे तेन हिंसा तेपि ग्रीया
मीयादिपशुहिंसायामिव निषेधाप्रवृत्तिन्यायस्य सर्वप्राणिषु समानत्वात् एवं चैवं विधा

नाडु. १५

निबन्धनानि स्नायम्मूलकत्वादनुवादकान्येव तथागामेव प्रत्यनपलब्धुपराशरः कूप:
स्नानेन तटास्नाने दीर्घत्वाने तथैव च अभ्भ्युपमत्वाने पुप्रायश्चित्तं न विद्यते निर्मानरितिशे
ष: दीर्घावाप्य: अस्यतु द्रोणपादि टमार्थत्वाने तु प्रायश्चित्तं मत्स्येवेत्याह समएव स्वकाये
टहत्वाने पुप्रायश्चित्तं विनिर्दिशेत् अतएव देवसेवनादिमात्रार्थत्वानि ने कूपतम्राण
दीप्रायश्चित्तं भवति विध्यप्रहत्यारागमात्रकृततेन निषेधप्रवृत्तेः लौकिकपशुहिंसाव
त् इति यमीये स्नानितकूपादौगवादिपाते दोषाभावनिरूपणं बहुवश्ठत्वपरिशिष्ट:
हे अथानो वारुणं विधिं वापीकूपतडागयज्ञ्यान्त्याम: शुभे तिथिकरणे शुभेन द
वे प्राचींदिशामास्थाय प्राक्प्रवणउदक्प्रवणेवाउदकसमीपे प्रिम्पप्रमाथायवारुणं १५

वैकं श्रपयित्वाज्यभागौ नेक्ताज्याहुतीर्जुहुयात्स्वेमद्भ्यो हेति प्रस्तृवंततो हविषा षष्ठाभिर्जुहुया
यामिवस्तृणा वेदमानरति पंवन्नत्राश्रेवरूणास विदानि निहेदमे मेवरूणाश्रुपीति वा स्विष्टकृते
वनवमे नवै प्राणाः प्राणा वा आपस्तस्मादापो नवभिर्जुहोति मार्जनां जेषेदेनारथेदवनीर्येमा
णामनु मेत्रयेदिदं मलिलेप विवेकुरुष शुद्धाः शृताः श्रमृताः सेत्वनित्यम मोतारयंतीकुह
नीर्योभिषिके लोकाल्लोकं तरन्नेनीयेतेवेति प्रक्षापं स्वयंलशो न्वारब्ध उन्नीर्योयोश्रस्मान्मानर :
श्रुपयंति सर्वा पणाजिनायादिश्चस्मापयेत्सु पवमाङ्गवतीर्हिम्भपा इति हिंकृते वै हिंकृणव
नीवस्त्वपत्नीवस्तनामिनि सवैलकंबोकोवन्नश्रृंगीहृषप्रजोरेप्पाद्धुरांकोस्पापदोहाविप्राय
दद्यादिनरोवाशश्माद्विणान्तरुत्सर्गं कुर्याद्देवपितृमनुष्याः प्रीयंतामिति पश्चात्स्नजेत

तस्मात्सृशौनको ब्राह्मणान्भोजयिता स्वल्पयनं वा वर्धयेत् मत्स्यपुराणे सूत उवाच जलाशय॰
ता३ गते विष्णुर्वाच रविनंदनः तडागारामकूपानां वापीषु नलिनीषु च विधिं पृच्छामि देवनाय
१८ तनेषु च केतन्नवर्तिनोनाथ वेदी वा कीदृशी भवेत् दक्षिणा वलयः कालः स्थानमाचार्यएव च
द्रव्याणि कानि शस्तानि सर्वमावक्ष्व तत्त्वतः मत्स्य उ॰ शृणु राजन्महाबाहो तडागादिषु यो विधि ः
प्राप्यपक्षे शुभे शुक्ल मतीते चोत्तरायणे पुण्येहि विप्रकथिते कृत्वा ब्राह्मणवाचनं प्रागुदक्प्र
वणे देशे तडागस्य समीपतः चतुर्हस्तां शुभां वेदीं चतुरस्रां चतुर्मुखां तथा षोडशहस्तः स्या
न्मंडपश्च चतुर्मुखः वेद्याश्च परितो गर्ता रत्निमात्रास्त्रिमेखलाः नवसप्ताथवा पंच योनिवक्त्रान्
पात्मज वितस्तिमात्रा योनिः स्यात्षट्सप्ताङ्गुलविस्तृता गर्तास्तत्र शस्ताः स्युस्त्रिपर्वोच्छ्रितमे १८

त्विलाः सर्वतः सर्ववर्णैः स्त्रुः पताकाध्वजसंयुताः अश्वत्थोडुंबरप्लक्षवटशाखाकृतानि च मंडप
स्य प्रतिदिशं द्वाराण्येतानि कारयेत् शुभोस्त्वत्राष्टहोतारो द्वारपालास्त्वथाष्टवै श्रेष्ठोत्रस्थापकः
कार्यो ब्राह्मणो वेदपारगः सर्वलक्षणसंपूर्णो मंत्रविद्विजितेंद्रियः कुलशीलसमायुक्तः स्था
पकः स्याद्द्विजोत्तमः प्रतिगर्भं तु कलशान्यूपस्योपकरणानि च व्यजने वासने शुभे ताम्रपात्रेसः
विष्टर ततस्त्वनेकवर्णास्तु सर्वेलयः प्रतिदेवतं ध्वावार्यप्रदीपेन्नुमावनुमेयादिवदनाः श्वरत्रिः
मात्रो यूपः स्यात्क्षीरवृक्षविनिर्मितः यजमानप्रमाणो वा संस्थाप्यो भूतिमिकृता हैमालंका
रिणः कार्याः पंचविंशतिवर्त्तिजः कुंडलानि च हैमानि केयूरकटकानि च तथांगुलीयविद्याणि
वासांसि विविधानि च दक्षयेच्च समं सर्वानाचार्योहिगुणान्वितः दयाक्षेयनसंयुक्तमात्मनश्चापि

पत्रिंशे सौवर्णौ कूर्ममकरौ राजतौ मत्स्यडुंडुभौ ताम्रौ कुलीरमंडूकावायसः शिंशुमारकः ए
ना०उ० वमासाद्य तान्सर्वानादावेव विशंपते शुक्लमाल्यांबरधरः शुक्लगंधानुलेपनैः सर्वौषधु
१८ दकस्नानैः स्नापितो वेदपुंगवैः यजमानः सपत्नीकः पुत्रपौत्रसमन्वितः पश्चिमद्वारमाश्रित्य
प्रविशेद्यागमंडपे ततो मंगलशब्देन भेरीणां निस्वनेन च रजसा मंडलं कुर्यात्पंचवर्णेन तत्त्ववि
त् षोडशारं ततश्चक्रं पद्मगर्भं चतुर्मुखं चतुरस्रं च परितो हृत्तमध्ये सुशोभनं वेद्यां चोपवित्र
कृताग्रहाल्लोकपतींस्तथा विन्यसेन्मंत्रतः सर्वान्प्रतिदिक्षु विचक्षणः कूर्मादीन्स्थापयेन्म
ध्ये वाहणं मंत्रमाश्रितः ब्रह्माणं च शिवं विष्णुं तत्रैव स्थापयेद्बुधः विनायकं च विन्यस्य कमला
मेव विकां तथा स्कंदं सर्वलोकानां मातृग्राममन्यसेत्ततः पुष्पभक्ष्यफलैर्युक्तमेवं कृत्वाधिवासने १८

ॐ भाश्वरत्नगर्भोत्सान्वासोभिरभिवेष्ट्य च पुष्पगंधैरलंकृत्य द्वारपालान्समेततः पठध्वमिति तां
ब्रूयादाचार्यस्तमिमृत्यं च बह्वृचौ पूर्वतः स्थाप्यौ द दक्षिणेन यजुर्विदौ सामगौ पश्चिमे स्थाप्यावुत्तरे
णाथर्ववेदिनौ उदङ्मुखो दक्षिणतो यजमान उपाविशेत् पठध्वमिति तां ब्रूयाद्धोतृकामुन रेवत उ
त्कृष्टमंत्रजप्येनेति ह ध्वमिति जापकान् एवमादिश्य तान्सर्वान्पूजयेद्योग्रे समन्त्रवित् ज्वडपा
हारुणौमैत्रे राज्यं च समासियत्नथा अस्तिगिभिश्च वहोतव्यं वारुणैरेव सर्वशः ग्रहेभ्यो विधिवद्ध
तानथैंद्राये श्वराय च मरुद्भ्यो लोकपालेभ्यो विधिवद्धिश्वकर्मणे रात्रिसूक्तं च रौद्रं च पावमानं
सुमंगलं जपेद्वन्योरुषसूक्तं पूर्वतो बह्वृचाः पृथक् शाक्तं रौद्रं च सौम्यं च कौश्माण्डं जातवेदसं सौ
रसूक्तं जपेरन्दक्षिणेन यजुर्विदः वैराजं पौरुषं सूक्तं सौपर्णं रुद्रसंहिता। शैशवं पंचनिधनं

ना॰उ॰
१५

गायत्रं महत्साम्नैव वामदेव्यं बृहत्तथा सौम्यं रैवतं रथन्तरं गवां व्रते विकर्णं च वरदो ब्रह्मयशस्तथा गा
येयुः सामगा राजन् पश्चिमद्वारमाश्रिताः आथर्वणाश्चोत्तरतः शान्तिकं पौष्टिकं तथा जपेयुः
र्मनसा देवमाश्रित्य वरुणं शुभं एवं पुरभितो रात्रावेवं कृत्वा पितामहे गजाश्वरथ्यावल्मी
कोत्संगमाहृद गोकुलान् मृदमानीय कुंभेषु प्रक्षिपेच्च ततस्तथा रोचनीं चैव सिद्धार्थान्नोथान्
गुग्गुलमेव च स्नपनं तस्य कर्तव्यं पञ्चरंगसमन्वितैः पञ्चकलशैर्महामन्त्रैरेवं कृत्वा विधानतः
एवं त्रयामतीवाद्यविधिपुरस्कृतेन कर्मणा ततः प्रभाते विमले संजाते च शतं गवां ब्राह्मणेभ्य :
प्रदातव्यमष्टषष्टिरथवा पुनः पञ्चाशद्वाथ षट्त्रिंशत्पञ्चविंशतिर्वा पुनः ततः सांवत्सरैः प्रोक्ते
शुभलग्ने सुशोभने वेदशब्दैः सगान्धर्वैर्वाद्यैश्च विविधैः शुभैः कनकालंकृतां कृत्वा जलेगा १५

मवतारयेत् सामगायचसादेयाब्राह्मणायविशेषते जलाशयंचत्रिहतासूत्रेणपरिवेष्टयेत्
पात्रीमादायसौवर्णींपंचरत्नसमन्वितां ततोनिर्दिष्यमकरंमत्स्यादींस्तांश्चसर्वशः क्षिप्तांश्चत्रा
भिर्विप्रैस्तुवेदवेदांगपारगैः महानदीजलोपेतांदध्यक्षतविभूषितां उत्तराभिमुखोवत्सुक्षोजल
मध्येतुकारयेत् अथर्वणेनसाम्नातुपुनर्मामेत्यृचेतिच आपोहिष्ठेतिमंत्रेणद्विजागत्यचम
ण्डपे स्रजयित्वासदस्यांस्तुबलिंदद्यात्समंततः पुनर्दिनानिहोतव्यंचत्वारिमुनिसत्तमाः चतु
र्थीकर्मकर्तव्यंदेयात्तत्रापिशक्तितः दक्षिणाराजशार्दूलवरुणंसंस्मरेत्ततः कृत्वातुपत्र
पात्राणियज्ञोपकरणानिच ऋत्विग्भ्यस्तुसमंदत्वामंडपेविभजेत्तुनः हेमपात्रींचशय्यांवर
स्थापकायनिवेदयेत् ततः सहस्रंविप्राणामथवाष्टशतंतथा भोजयेच्चयथाशक्त्यापयवाः

श्राद्धाय विंशतिं एवमेव पुराणे तु तडागे विधिरुच्यते कूपवापीषु सर्वासु तथा पुष्करणीषु च एष
ना॰ड॰ एव विधिर्दृष्टः प्रतिष्ठासु तथैव च मेरुतस्तु विशेषस्यात्प्रासादोद्यानभूमिषु अयं तु शङ्काबद्धेन विधि
२० र्दृष्टः स्वयंभवाख्यल्पेष्वेकाग्निवत्कार्यं विन्नशाढ्याहतेन्नृभिः प्रावृट्कालस्थिते तोयमग्निष्टोमसमं
स्मृतं शरत्कालस्थितं यत्स्यात्तदुक्तफलदायकं वाजपेयातिरात्राभ्यां हेमन्तशिशिरे स्थितं अश्व
मेधसमं प्राहुर्वसन्तसमये स्थितं ग्रीष्मे च यत्स्थितं तोयं राजसूयाद्विशिष्यते एतान्महाराजविशेष
धर्मान्करोति योऽर्थानथ शुद्धबुद्धिः नाम सयाति रुद्रालयमाशु पूतः कल्पाननेकान्दिवि मोदते च अने
कालोकान्समहस्रपादीन्भुक्त्वा परार्धद्वयमङ्गनाभिः सहैव विष्णोः परमं पदं यत्प्राप्नोति तद्योग
बलेन भूयः नलिनीषु पुष्करणीषु अतीत इति मकरसंक्रान्तौ हन्तायामित्यर्थः भविष्योत्तरे तु॥

निष्पन्नेवद्धपालीकेसर्वैर्द्रुदाविवर्जिते सोपानपंक्तिसहितेपाषाणैः सर्वतश्चिते तास्मिन्सलिलसंपू
र्णैकार्त्तिकेचविशेषतः तडागस्यविधिःकार्यः स्थिरनक्षत्रयोगतः मुनयःकेचिदिच्छंति चैत्रेनीतेचो
त्तरायणे नकालनियमंस्तत्रसलिलंतत्रकारिणे इयंसलिलसत्त्वाप्रायान्योक्तिर्विहितकालेजल
हीनत्वदृष्टजलाप्रायविषया वह्निपुराणेतुसंक्रांतिभेदेनफलभेदउक्तः वापीकूपतडागानांत
स्मिन्कालेविधिःस्मृतः शुदिनेशुभनक्षत्रेप्रतिष्ठाशुभदास्मृता कर्कटेपुत्रलाभःस्यात्सौख्यंतुम
करेभवेत् मीनेपशोर्थलाभःस्यात्कुंभेचसुबहूदकं वृषेचमिथुनेहृष्टिर्हानिश्चिकेथजलंभवेत् पि
तृतृप्तिस्तुकन्यायांतुलायांशाश्वतीगतिः सिंहोमेषोधनुर्नाशंजलस्यद्विजपच्छति शुभेपहो
ति फलानिप्रायहेतुतयाशास्त्रबोधिते विप्रकथितेमौहूर्त्तिकविप्रोक्ते अनेनज्योतिः प्राप्त

ताउ: २१

निषिद्धकालवर्जनेनतद्विहितकालादरश्लोकः निषिद्धकालाश्च वसिष्ठः वापीकूपतडागयागगन
दौरप्रतिष्ठाव्रतेविद्यामंदिरकर्णवेधनमहादानेवनेसेवनं तीर्थस्नानविवाहदेवभवनमंत्रादिदेवेक्ष
णंदूरेणैवजिजीविषुःपरिहरेदस्तंगतेभार्गवे तथामलिम्लुचेमासिसुराचार्येतिचारगे वापीकू
पतडागादिक्रियाःप्रागुदिताःत्यजेत् अन्यत्रापि यथासिंहस्थितेजीवेतथैवमकरस्थिते देवा
गारतडागादिव्रतोद्यापनकर्माणिच विवाहादिमहाभागमहाभयकरंभवेत् सामान्यतोपिनि
षेधः वालेशुक्रेवृद्धेशुक्रेजीवेवालेवृद्धेजीवे जीवेनष्टेजीवसिंहेसिंहादित्येजीवादित्योउल्कापाते
चनिर्घातेतथैवाकालवर्षणे छिद्रेस्तथैवसंदृष्टेनकुर्यान्मंगलक्रियां एवमन्येपिनिषेधाज्ञेयाः
विहितकालश्च वराहमिहरः हस्तेत्वाश्वपौष्णकेशवमघामूलात्तरेरोहिणीदेवेंद्रेषुतुशुक २८

सौम्यशशम्भ्रद्रागीश्वावारांश्चाके रिक्तांच्छिद्रतिथिंविहायहृष्टभेनक्रीकुलीरेथयटेमीनेकूपत्तडागकर्मम्भनय २५
प्रांसतिशुद्धेहृमे इत्यादिविस्तरयापन्नेर्वेङनोक्ताने अत्रचकालेसमम्यायारतयोक्तायद्यपिब्राह्मणवावनी
दीनिवहूनुक्तानितथापिप्रायानन्यथ्यवददितिएवलयः कालइतिकालस्पष्टहृतेनवकव्यताब्राह्मणवा
चनोदीनांवांगततयाप्रधानकालानुरोधेन सर्वकर्मव्यतानपृथककालविधनाकोक्तएतत्रयानमेवाधेयत
याचेति एवंचोक्तकालविधिनिषेधवाक्यानुगुणपमपि तथावकथितइत्यस्मानंतरेतडागादुत्सर्जेदि
निप्रोषः अधिवासनदिनकृत्यमाह कृत्वेति वेदिंकुर्यादित्यन्वयः अत्रचब्राह्मणवाचनात्सर्वकर्मव्यप्रसा
२५ णांतरप्राप्तत्वात्रोक्तं तथाहि एवंविनायकंपूज्यग्रहांश्चैवविधानतः कर्मणांसिद्धिमाप्नोतिश्रेयश्चाप्नो
धु१२ त्यनुत्तममिति याज्ञवल्क्यवचनात्सेकल्पपूर्वकमविघ्नसमाप्त्यर्थंविनायकस्यग्रहाणांवादौपूजा ततः

ना॰उ॰ आचारप्रमाणकः प्रधानसंकल्पः ततो मातृपूजापूर्वकमाभ्युदयिकश्राद्धं नानिष्ट्वा तु पितॄन् श्रा
२२ द्धे कर्म वैदिकमाचरेत् तेभ्योपि मातरः पूर्वं पूजनीयाः प्रयत्नत इति शातातपोक्तेः न वेतावता श्रा
द्धांगमातृपूजा कर्मादिषु च सर्वेषु मातरः सगणाधिपाः पूजयंतिताः इति कात्यायनेन साक्षा
त्कर्मान्वयोक्तेः अत एव श्राद्धसंकल्पात्पृथगेवास्याः संकल्पः मातृकर्मांगेषु च पृथक्संकल्पः आचा
रप्रमाणकः शौनकेन तु तथा श्राद्धस्यैव प्रकृतकर्मांगतायामाने यज्ञोद्वाहप्रतिष्ठासु मेखलाबंध
मोक्षयोः पुत्रजन्मवृषोत्सर्गे वृद्धिश्राद्धं समाचरेदिति विष्णुपुराणीयं वचः प्रतिष्ठासु देवतडागा
रामादीनां मातरं स्वष्टस्थायविशिष्टं गौरी पद्मा शची मेधा सावित्री विजया जया देवसेना स्वधा स्वा
हा मातरो लोकमातरः धृतिस्तुष्टिस्तथा पुष्टिस्तथात्मकुलदेवता आदौ गणाधिपः पूज्यः अंते २२

चकुलदेवता प्रतिमास्तु चण्डहास्तु लिखिता वा पटादिषु अपि वांते देवपूजेषु नैवेद्यैश्च यथाविधैः
नैवेद्यैरिति पूजोपचारांतरोपलक्षणं ब्राह्म्यादिसप्तमातृपूजनमप्युक्तं चतुर्विंशतिमते ब्रह्मा·
ण्याद्याः स्मृताः सप्तदुर्गा क्षेत्रगणाधिपाः वृद्धावृद्धौ सदा पूज्याः पश्चान्नांदीमुखान् पितॄन् तास्त्र ब्रा
ह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा वाराही च तथैंद्राणी चामुंडाः सप्तमातरः ततो वसोर्धाराप्रण
तिज पृथक् छंदोगपरिशिष्टे मातृपूजामुक्त्वा कुड्यलग्नां वसोर्धारां पंच धारां घृतेन तु कारयेत्सप्त
धारां वा नातिनीचां नचोच्छ्रितां आयुष्याणि च शांत्यर्थं जप्त्वा तत्र समाहितः षड्भ्यः पितृभ्यस्तदनु
श्राद्धदानमुपक्रमेदित्युक्तेः षड्भ्य इत्युपलक्षणं मातृश्राद्धं तु पूर्वं स्यात्पितॄणां तदनंतरं ततो मा
तामहानां च वृद्धौ श्राद्धत्रयं स्मृतमिति शौनकोक्तेः इदं च यथाकुलदेशाचारं सपिंडकमपिंडकं

मपिंडकेवा नष्टकंभविष्यत्पुराणे पिंडनिर्वपणंकुर्यान्नवाकुर्याद्विचक्षणः वृद्धिश्राद्धेकृत्वाचारदेश
कालाद्यपेक्षया एतावत्कृत्वाब्राह्मणवाचनात्स्वस्तिपुण्याहवाचनेकुर्यात् तत्रावनिकृतजानुमंडलइत्या
दिवह्वृचपरिशिष्टोक्तं ब्राह्मणानन्नेनपरिविष्यपुण्याहंस्वस्तिऋद्धिरित्योंकारपूर्वकंत्रिस्त्रिरेकैकामा॰
शिषंवाचयेदितिबौधायनोक्तंवायथाचारंकार्यं तत्रसोंकारंब्राह्मणेयजमाने हस्तत्रियादौ तन्निरोंकारंशूद्रे
तस्वस्तिमात्रं यदाहयमः पुण्याहवाचनेप्रक्रम्य सोंकारंब्राह्मणेकुर्यान्निरोंकारंमहीपतौ उपांशुस्तथा
वैश्येस्वस्तिशूद्रेप्रकीर्तयेत् तत्रविशेषमाहव्यासः संप्रश्नपगेयमाल्पार्थेर्ब्राह्मणान्स्वस्तिवाचयेत् का
म्यकर्मणिमांगल्येसंग्रामाद्भुतदर्शने ततोवास्तुपूजाकार्या वास्तुपूजामकुर्वाणस्तवाहारोभविष्यती
तिमात्स्येनदकरणानिदनादितिहेमाद्रिमदनरत्नादौ मंडपप्रतिष्ठोत्तरमित्यन्यत्र प्रागुदकप्रवणइति

प्राक्प्रवणउदक्प्रवणेवादेशे यद्वाईशानप्रवणइत्यर्थः यद्यप्यत्रतडागस्यसमीपत्वइत्यविशेषतउ
क्तंतथापिसांप्रदायिकावाराजलाशयपश्चिमेमंडपःकार्यः तडागात्पश्चिमेपूर्वईशान्यामुत्तरेथवा
प्रादौतुमंडपःकार्यः शुभलक्षणसंयुतइतिवचनात्पश्चिमपूर्वैशानोत्तराणामन्यतमदेशेवायुक्तंमं
डपकरणं तत्त्ववारिणोपरि तडागपालीशीर्षेतुमंडपंकारयेच्छुभमितिभविष्योक्तेः चतुर्हस्ता
मिति प्रकरणपठितेनानेनमानेननिराकादृतावाहदीमंडपस्यत्रिभागइतिपंचरात्रोक्तमानेनप्रवर्त्त
ते तेनषोडशहस्तोपिमंडपेनाशगुलाधिकपंचहस्तावेदिः उक्तातुविशेषानुक्तेस्तडकैव चतुर्थांशे
त्रितिस्तस्यास्त्रिसमपंचतोपिवा नवकादशभागेस्ताभिष्टकाभिःप्रकल्पयेदिति चतुर्भेवितेचवेधा
तुलादानादावष्टहस्तमप्यत्राधिकंविधीयते मंडपोपिषोडशहस्तएवात्रविशेषोपदेशात् नतुदश

हस्तादिशाकान्तोभावात् गर्ताः कुंडानि तेचवेदिभित्तिनो द्वादशत्रयोदशत्रिंशाद्यंगुलानि कंठमेख॰
ता॰३॰ लात्रयये गर्यवदेशेपरित्यज्यखननीयाः भविष्यत्पुराणे वेदीपादोत्तरेसत्काकुंडानिनवपंचवा तथा
२४ न्यत्रविदिभित्तिंपरित्यज्यत्रयोदशभिरंगुलैः कुर्यात्कुंडानिचत्वारिचतुर्दिक्षु यथाक्रमं नारदीये
कुंडवेद्यंतरेचैवसपादकरसंमितं रत्निमात्राः एकविंशत्यंगुलोरत्निः रत्निस्त्र्यंगुलिपर्वाणिविस्ते
२५ यस्त्वेकविंशतिरित्यादितत्पुराणान्त नावदाधामविस्ताराः हस्तमात्राइति रूपनारायणादयस्तद्विं
ते त्रिमेखलाइतिविशेषाकेचेकमेखलतापंचमेखलोतावानभवति नचेति ग्रंथेचविकल्पश्चाद्यद्वय
देफलानिशायार्थः कर्मणामल्पमहतांफलानांचस्वर्गोचरे विभागस्यानसामान्यादविभागोपिचो
दितइतिभट्टोक्तेः तत्रपतत्रयेप्यावार्यकर्तृकस्तेमायेकएवगर्तस्तस्यैकत्वात् इतरनिर्जातुप्रतिवेदं २४

द्वौ ह्वावित्यहैोगमौ॑ः तद्दलार्द्धेषोडशहोमाः एवमाचार्यकर्तृनैनसहनव अयमत्कृष्टतमः पक्षः द्वि
तीयपक्षेतुप्रथमोपस्थितत्वात्ऋग्वेदयजुर्वेदयोरेवद्वौद्वौगमौ॑ इतरयोर्द्वौगुरुगर्तेष्वकः एवंसप्त अय
मत्कृष्टतमः पक्षः तृतीयपक्षेप्रतिवेदमेकैकोगर्तः गुरोश्चैकइतिपंच अयमत्कृष्टः पक्षः एकाचार्य
कर्तृकत्वेत्वेकएवगर्तइतिजघन्यः पक्षः ॥ इयमत्रव्यवस्थेतिरत्नाकरः योनिर्वक्रंचकंठीयेषुतथा
नानिविक्ताइतिपाठेत्वनुवादः आधिक्यप्रसक्त्यभावात्विधेयानुपपत्तेः वितस्तीति इहापिविशेषाय
देशादायामविस्तारयोरिदमेवप्रमाणंनतुकुंडार्धे अंशविस्तृतत्वमितिसामान्यतउक्तं विस्तारेचषट्सप्त
तिविकल्पः त्रिपर्वेति इयमेवोच्चतानत्वविस्तारस्तुल्यत्वादि विस्तारेत्वविशेषानुक्तोर्द्विवितस्तिभिः कुं
डचत्वविशेषेरेवमाने सर्वतःसर्वदिक्षु सर्वेषांदिक्पालानांवर्णायासांताः सर्ववर्णाः ध्वजसंयु

नाइतिध्वजानामपिसर्ववर्णतांदर्शयति महाध्वजोपिवानेनसंगृहीतः अपरेतुमहाध्वजमेवाङ्गर्नेतु·
नाड· दिग्ध्वजान् अस्मस्येति अत्रशाखादिःप्रदक्षिणक्रमः उदगादिरप्रदक्षिणक्रमइत्यपरे अत्रद्वारेषुकार्या
२५ णिचतोरणानिचतार्यपिक्षीरवनस्पतीनामितितुलाप्रकरणेमात्स्येद्वारतोरणयोर्भेदोनेहद्वारश
ह्वेनतोरणलक्षणा अन्येत्वयथाश्रुतमेवाहुः प्रयोगेवकुंडमंडपादीनांसिद्धवत्संक्षेपंवक्ष्यामः शुभाइ
ति न्यूनातिरिक्तोगाभिशापान्हविदोषहीनाः सर्वविशेषणंवेदं आचार्यमाहसर्वेति स्थापकआचा
र्यः प्रतिगर्तंप्रतिकुंडं कपिंजलन्यायेनत्रीस्त्रीन्स्रगादिभूषितान्वक्ष्यमाणमार्गेणकलशान्स्था
पयेदितिशेषः क्वचित्कलशामित्येकवचनांतःपाठः यज्ञोपकरणानियथाशाखंस्रुवादीनि व्यजनम
ग्निसंधुक्षणाय अग्रेआसनेहोत्रोरूपवेशनाय ताम्रपात्रेहोमीयद्रव्यनिधानाय सर्वविहरेकुशासनतु २५

क्ते इति शुभ्रासनविशेषणयोरुपपन्नात् हविर्लब्धइतिपाठेनाम्नपात्रयोः अनेकवर्णाइति नानारूपाः तेव
ग्रहार्थे गुडौदनादयः अधिदेवताप्रत्यधिदेवताविनायकादिपंचकार्थे पायसे दिक्पालार्थे वमाषभक्त
मित्येवं रूपाः अभिमंत्र्य तत्तद्देवतालिंगकमंत्रैरभिमंत्र्येत्यर्थः अरत्निमात्रेइति कूर्परोपक्रमकं निष्टि
काग्रान्तोरत्निस्तन्त्रयमित्यर्थः इदं चारत्न्यादिमानं यजमानस्यैव दानवावनात्वारंभणावरवणव्रतप्रमा
णेषु यजमानेप्रतीयादितिकात्यायनोक्तेः एवं वेदीमंडपकुंडादिप्रमाणेष्वपि वीरहस्तावठाम्बस्पोडं
५५ बरादयः यजमानप्रमाणेनेति यजमानो यत्ताप्रमितः इदं च भस्माद्यंगुणफलार्थे मानान्तरं नीचैः सदो
श्रा३ मानवत् सेस्याप्येतानि विंधेयः अत्रपाठक्रमाद्दालिदानोत्तरमेव तन्निखनने एपं च वर्णभेदेन विशेष उक्तो भ
विष्ये कडेवाश्वत्थपालाशार्विकंकतमयः स्तंभः ब्राह्मणस्यतु निर्दिष्टो यूपः श्रुतिविवदाणेः न्यग्रोधवि

ता॰ड॰
२८

त्वजः शाल्मलः क्षत्रियाणां वा खादिरः वैश्यस्यौडुंवरमयो मध्यकार्जुनसंभवः विभीतकोडुंवरजः शाक
शाल्मलिसंभवः शूद्रस्य यूपो निर्दिष्टः सार्वदारुमयोथवा मानांतरं चोक्तं तत्रैव शिरोललाटहृदय
नाभिमात्रो यथाक्रमं यजमानप्रमाणो वा संस्थाप्यो भूमिनिमित्तता यूपनिखननस्थानं वनारदीये
तडागोत्सर्गे तत्रैव यूपस्थाने प्रकीर्तितं अन्यत्र तु वारिमंडपयोर्मध्ये दीर्घे वा न्युभलर्दाणः समस्त
त्रे तडागस्य यूपस्तंभं निवेशयेत् तथा ईशानेन निपानस्य सर्वस्य यूपं यथोदितं पूर्वं उंडान्त्राव्यादिषि
दमात्रान्भ्रमित्यन्तानि विषुशुति हूपनारायणाद्यां यूपाधिवासनं च सार्वदेविक्यामुक्तं तत्संग्रहा
र्थं प्रयोगे वक्ष्यामः किंतु निर्मूलं अत्र वाष्टाश्रतादयः कार्याः आहवनीयादिवत् संस्कारनिमित्त
कयूपराहृप्रयोगात् अन्यथा लौकिकत्वेन यूपत्वाभावापत्तेः नवाखिलेवालीयूपो भवति उपशयो यू २८

26

पोभं वनीतिवद्द्रूपेयवगोणोयं रूपशब्द इतिवाच्यं तत्कारणपदान्तरसामानाधिकरण्याभावात् त
त्रवस्तूपकार्यंपशुनियोजनप्राकृतरूपशब्देन लक्षितमुद्दिश्यतत्रसमेलेवालीविधीयते नैवं प्रकृतेयः
शुनियोजनमास्ति यत्सूदेत् नवास्यतत्राविधेयमस्ति किंच तत्रस्विलेवासीतभंगायतेनैतत्क्षणाद
यः नैवमवस्वरूपभगः कश्चित् रुंडपशायेतत्स्तनायं रूपतमुच्यते नवात्रसासंभवतिविधेयान्तराभा
वादविधिशेषत्वात् तस्मात्सुखिपवायशस्पेइतितन्निमित्तभूतंयमेपशुभिः नैवेवं स्वरूपकरणपत्निः
५० स्वरूपणपशुमनक्तीतिपशवंजनार्थस्यस्वरोर्धूपस्यस्वरूंकरोतीतिरूपावयवत्वमात्रवोयनेन रूपा
५३ र्येताभावस्यवक्तर्थेसाधितत्वात् पशुनियोजनेत्तु न रूपार्थमपवक्तव्यदर्थमितितदपिनापद्यते
नतुतर्हि किमर्थं स्यपनिखननं श्रद्दष्टार्थमितिचेत् हिनत्यकत्रूदष्टार्थस्यापरत्वापितदर्थ्यं नैवनि

यता सर्वौषधयावहैत्ति इतिर्वेद्वचनं वृष्णादद्रष्टार्थत्वस्याप्युपपत्तेः वृषालये अश्वस्त्वबायत्तदृत्तीति लिंगाद
ताउ॰ र्शनेन सूषार्थत्वात्वृषालवकार्यं एवं चानेकार्थत्वायोगान्मुख्यमुपपत्तेसत्ति तत्स्पर्शो निमित्तकं स्मार्तं सर्वैलक्षा
२८ नादि भवतीति दिक् हेमालंकारान्दर्शयति कुंडलानि चेति केयूरं बाहुभूषणं कटकः करभूषणं वा
सांसीत्यूतिगपेत्नयावडुवचनं प्रत्येकं तद्देदेयं वस्त्रयुग्मं तथा सत्वं केयूरं कर्णभूषणं अंगुलीभूषणं चैव
मणिबंधस्य भूषणं कंठाभरणयुक्तानि प्रारंभे यमकर्मणः पुरोहिताय दत्वाथ ऋत्विग्भ्यश्चापि दापये
दिति लिंगपुराणोक्तेः देयप्रसंगाद्दक्षिणामाह दद्यादेव्रत्ति सर्वेभ्यः समां दक्षिणां दत्वा कर्मसमर्था
न्कुर्यादित्यर्थः दक्षिणावदत्वा संपादिकेति सापितेत्ततीयेध्याये आचार्ये द्विगुणामिति देशुणं चैकर्ति
दिपापेदयाद्विगुणस्तवर्णघटितत्वमलंकरणेषु वासमोत्वमल्पतः कश्चित्तु संख्यातोपि द्वैगुण्यमाह २८

तत्र अदृष्टतार्थापत्तेः दद्यादिति आत्मनश्च दातुश्च मिहं यद्दुस्कन्तब्रह्मण्यांवदद्यादित्यर्थः डुंडुभो राजिलः
कुलीरः कर्कटः आपसालोरुः एतांश्च यथाशक्ति सुवर्णनिर्मितपात्रे पंचरत्नयुतायां निदिध्यमंडल
मध्ये स्थापयेत् पात्रीमादाय सौवर्णीमित्याद्यग्रेभिधानात् क्वचिदन्योपि विशेषः शान्तकुम्भमयं देवं
रूपेण कारयेत्सुधीः सवाहलसस्यपानीयं तद्दत्वाशंवदेद्दिणे आहू ढमकरेशुभ्रे कूर्ममत्स्योपशोभितं
जलनाथं प्रकुर्वीत ससर्पं दंडराकृतिं तथा रजतेन जलौकाश्च सीसकेन तु दर्दुरान् शंखचक्रगदाब्जानि
शुक्तिरूप्येण कारयेत् हंसादिपक्षिणः श्वेताः कर्तव्या रजतेन तु चक्रवाकादयः पीतास्ते कार्याः कांचने
न तु रक्तास्ताम्रेण कर्तव्याः कृष्णासीसायसासृताः पद्मिनीं पंचरत्नैश्च पद्मरागादिनिर्मितां ये चान्ये
जलजाः केचित्ते कार्या रजतेन तु सर्वानपि यथास्थानं स्वर्णपात्रे निधापयेत् पात्रीमादाय सौवर्णीम

करादिसमन्वितां प्रदीपेत्कुङ्कुमभावेनयजमानमोजस्नानार्थमिति भविष्योत्तु सौवर्णंकारयेत्कूर्मंताम्रेण
ना॰उ॰ मकरंतथा रजतेननतथामत्स्यंत्रपुणादर्दुरंतथा रजतेननतथामत्स्यं। शिशुमारंजलौकाश्चरजतेनैवका
२८ रयेत् सर्वानपियथास्थानंताम्रपात्रानिधापयेत् इति इदंतुवहवोनाचरंति आदावेवकर्मोपक्रमा
त्प्रागेवासादनार्थंसन्निधाप्यस्मर्थः इदंवोपलक्षणं तेनान्यदपिप्रकृतकर्मोपयोगिप्राक्सम्पादयेत्
सर्वौषधीति मुरामांसीवचाकुष्ठंशैलेयंरजनीद्वयं सटीचंपकमुस्तावसर्वौषधिगणःस्मृतः इ
तिच्छंदोगपरिशिष्टेसर्वौषध्यः मुराभटेउरगौडेप्रसिद्धं मांसीजटामांसी शैलेयंतज इतिप्रसिद्धं
रजनीद्वयंहरिद्रादारुहरिद्रांच सटीकचूरः पतगुनेनोदकेनस्नातः स्नानेप्रकारमाह वेदाभिषे
र्वेदादिभिःस्नापितइति एवंवनदेस्थाने अरहृदयकल्पनापातात् स्नानस्नापितइतिवापाठः तदा २८

५५

सर्वौषध्युदकमेवस्नाने स्नानसाधनंकरणेल्युट् तेनस्नापितइत्यर्थः पश्चिमद्वारमाश्रित्य तेनद्वा
रेणेत्यर्थः प्रविशेदित्यनेनमंडपप्रतिष्ठाप्युपलक्ष्यते अतएववक्ष्यमाणरीत्यास्थापिकार्या आचार्यकृत्य
माहततइति मंगलशब्दः शांतिपाठगीतादि सहार्थेतृतीया तेनसमकालतालाभोमंडल
करणे कश्चित्तुमंडपेप्रविशेदित्यत्रैवमंगलशब्दादेरन्वयइत्याह रंजेति श्वेतरक्तपीतकृष्णहरिते
रजोभिर्वाहृणेमंडलेकुर्यादित्यर्थः तत्रचित्तमंडलकरणतत्त्वः संक्षेपतोमंडलकरणंदर्शय
५५ ति षोडशारमिति ततस्तत्रमंडलेकर्णिकावृत्ते अष्टदलात्मकंपद्मगर्भषोडशारंचक्रंकुर्यात् तस्यपरि
५१२ तोमध्यहस्तकेचतुर्भुवचतुर्द्वारंचतुरस्रंपीठाख्यंकुर्यात् मध्येहस्तानिचपंचचक्राधाराद्रूपाणि स
र्वशोभनमितिमत्स्यपुराणोक्तशोभायुक्तं तथाहितत्रमंडलनिर्माणप्रकारउक्तः वेदप्रमाण

ना॰ ड॰ कंचेष्वारजोभिः पंचवर्णकैः मंडलं वर्णयेत् प्राप्ते न स्यूने नाधिकं क्वचित् शालिचूर्णेन वै श्वेतं कौसुंभे
२९ लोहितं भवेत् पीतं निशाभवं ज्ञेयं कृष्णं दग्धैर्हयमस्मजं हरितं बिल्वपत्रोत्थं मंडलार्थे रजः स्मृतं प्रधानं
स्यासनं त्वेतन्मानसूत्रेण सूत्रयेत् सर्वं प्रसादयेत् तत्र मृत्तुषुधं यथा भवेत् संवृद्धं ध्वजसूत्रं तत्सूत्रमंकये
द्धिंडनामतः याम्यवारुण्यकं पदं वै कौबेरं संप्रसारयेत् कौणेभ्यो मीयते भूयो दत्तं विंडवत्तु हयात् सर्वत
समन्तात्तु यथा पार्श्वसूत्रं निपातयेत् वस्त्रद्विज प्रसार्यैवं सूत्रमन्यत्कालयेत्समे श्रेष्ठो भागान्प्रकुर्वीत मं
डलेत्तु कनीयसि सूत्रार्द्धेन भजेत्तावत्स्यार्द्धेन पुनस्ततः तस्यार्धार्धेन संभज्य सर्वान् बिंडभिरंकयेत्
श्वेकेभ्यः समन्तात्तावत्पार्श्वसूत्रं प्रसारयेत् एवं विभज्य तत्सूत्रमुभाभ्यामष्टधा समं तस्मिन्द्वारादि
सिध्यर्थं कोष्ठकानि विलोपयेत् षड्भिः षड्भिस्तथा सप्त ताविद्वितीयासु द्वयं द्वयं मध्यवर्तीनि कोष्ठानि लेपनी २९

यानिदेशिकैः कोणजातानिकोष्ठानिकपोलार्थेनलोपयेत् गात्रार्थेवविलोप्यानिपंचपंचतदंतिके ५०
भ्रतःषोडशकानीहकोष्ठकानिस्थितानिवै तेषांचत्वारिमध्यानितत्काशेषाणिलोपयेत् तद्विलोया
न्वेत्पीठंचतुरस्रंसमंततः मानसूत्रमथादायदेशिकः कटिनीतथा एकतःसूत्रमारोप्यमध्येसव्येन
पाणिना अंगुलानिबहिःपंचत्यक्त्वापीठेसमंततः भ्रामयेदपसव्येनसूत्रकंखटिकान्वितं मंडलंजा
यतेतस्मात्पीठेऽस्मिन्सर्वतःसमं चतुरस्रैवततःकोष्ठप्रदेशेतथापुनः चतुरष्टांगुलेमध्येकुर्याद्द्वेमं
३० डलद्वयं अंगुलानिचतुर्विंशोबहिस्तस्यापिमंडले ततःषोडशभिर्भागैःपत्रदेशेविभाजयेत् दिग्वि
५१.२ दिग्मध्यस्त्यानिर्यंकपोसूत्रेणदेशिकः एवंसकलमासूत्र्यमंडलंवेदिमध्यगं रजःपातंततःकुर्या
दपसव्यकरेणतु प्रथमंकर्णिकाबिंबंसितेनरजसालिखेत् पश्चात्तत्प्रथ्येपीतेनपाणिनादक्षिणेन

ता॰उ॰
३०

ते शुक्ललोहितपीतेन कैसराणि द्वितीयके दलसंधिगतारेखाः शुक्लैकांगुलसुंततः दलाग्राच्छा
ग्रं शुक्लेन दद्यादग्रेषु पाटलं दलान्तरालकं सेन रजसाच्छादयेत्ततः पद्मस्यावरणं शुक्लं रेखासमम
न्नतम् अतः परिलिखेच्चक्रं पंचवर्णसमुज्ज्वलं श्यामपीतारुणश्वेतामध्यभागेयवाकृतीन् आरा
न्समालिखेत्तत्र द्वाणिकाभिः सुशोभनान् आरान्तराणि सर्वाणि यथाशोभं विभूषयेत् रजोभिः पं
चभिः पंचवर्णकं धारा बहिर्लिखेत् सितपीतारुणश्यामहरिताः क्रमडबेलाः चक्रस्य बाह्यतः
पीठं भूषयेच्छ्यामवर्णकैः रजोविस्तारयेद्धि द्वरेखां दद्याद्विदिक्षु वै वृत्तरस्रोलिखेद्रेखां सिते
न रजसा ततः बाह्यवीतिलकपत्राणि दद्यात्पीठे यथेच्छया उपपीठं तृतीयं च यथाशोभं विभूषयेत्
ततो द्वाराणि चत्वारि लेखयेत् सितया लिखेत् पीतश्यामसितहरितानि द्वारस्याभ्यन्तराणि वै प्र ३०

वैदिक्रमयोगेनरजोभिर्मंडलयेत्पृथक् गात्रकंरक्तमाग्नेयंहरितंनैऋतेनतथा वायव्यंधूम्रवर्णाभ
मैशानेयवलेनतथा कपोलाःकोणसंकीर्णावर्णावितयमृषेणः चतुरस्रामितारेखांवाह्येदद्यात्समे
ततः इति ग्रस्यार्थः वैदेति कर्णिकाकेसरदलाग्रवहिर्मंडलात्मकंमंडलचतुष्टयमित्यर्थः यत्तुक
विकर्णिकाकेसरदलाग्रवहिर्मंडलरूपमंडलयेत्रचक्रमुक्तंतद्दलदलायथोविभक्तदेशज्ञानार्थं
यद्यावत्रहस्तप्रमाणकंमंडलंवाहणमंडलेकुर्यादित्यर्थः पंचवर्णैरजांसिनियमयतिप्राग्लीति
३१ निशाहरिद्रा पंचवंरजांसियंचवर्णानिमंडलार्थंहिकारयेत् शालितंडलचूर्णेनशुक्लंवायवसंभ
५१३ वं रक्तंकुसुंभसिंदूरगैरिकादिसमुद्भवं हरितालोद्भवंपीतंरजनीसंभवंक्वचित् कृष्णंदग्धैर्य
वैःकार्यंहरितंपीतकृष्णजमिति पंचरात्रागुक्तंरजोंतरमिहनद्याप्तं ग्राकोन्नाभावान्नेप्रयत्नाग्रः

कारमाह प्रधानमिति वक्रलेखनस्थाने मंडलेषु मुख्यमिति वा मानसूत्रेणेति यद्यपीह मानेऽश्वत्था
ना॰इ॰ नो क्रान्तया व्यपर्यायवत्तु हस्तमुपपीठे सिध्यति तथा हि वृत्तः षष्टिकोष्ठेषु मध्यवृत्तः कोष्ठात्मकं च वृत्त
३१ विंशत्यंगुले मंडले वर्द्धते तेन हस्तमात्रं पद्मपीठं सिध्यति तद्बहिः सर्वतो वितस्तिमात्रव्यापि द्विहस्ते
वक्रपीठं तद्बहिः सर्वतो हस्तमात्रव्यापि वृत्तहस्तमुपपीठं सिध्यतीति अत एव वृत्तादिकप्रसारणा
नुरोधतः षोडशहस्तं कार्पासदारकमादायेति सिद्धवन्निर्देशकारणाद्धः सर्वाङ्गुलस्थूलः कार्यः
कर्तव्यमंडलायन्तरोधात् कनिष्ठिकास्थूल इति त्वकस्मात् तद्धि वार्यं पूर्वामिति दक्षिणेनरेव
त्वहस्तं सूत्रं प्रसार्य विंडनो भवतः प्रांते केचये दित्यर्थः याम्ये दक्षिणे कौवेरे उत्तरे सूत्रत्रयेणैव को
णविंडवत्तृद्वयसिद्धेन पश्चिमसूत्रप्रसारणमुक्तं वृत्तस्य साम्यापायमाह कोणेभ्य इति कर्णसू ३१

उहयसाम्येन समन्तात्तेयतिभावः सर्वतइति वत्रदिंदुसूत्रंनिपात्यास्फाल्यरेखावत्नुष्टयेनसर्यैवकु
रस्येकार्यमित्यर्थः अष्टाविति कर्णान्तरोपपुत्कमात्स्याक्रमहामंडलापेक्षयाकनीयसिप्रकृतेमंडले
कर्णेषुउभयतोभागाष्टकंकार्यमित्यर्थः भागकरणोपायमाहसूत्रार्धेनेतितावत्सायम अंकेभ्य
इतिअंकसमन्तान्तादांकभ्यः सूत्रंप्रसारयेदित्यन्वयः उभाभ्यांउभयतः एवंचप्रत्येकंद्वादशांगु
लानिवत्रः षष्टिकोष्ठकानिभवंति तस्मिन्वत्रःषष्टिकोष्ठकेदेवं कोष्ठविलोपनंविशदयतिपंक्ति
३५ क्तिषुइत्यादिना दैशिकैःदेशविभागज्ञैः गात्रार्थेचेति अत्यपंक्तौकपालार्थकोष्ठोभयदिक्स्थंको
५१३ ष्ठद्वयंद्वितीयपंक्तौचकोणकोष्ठंतत्रतस्मभयतः कोष्ठद्वयंचेतित्रयमित्येवंप्रतिविदिशंकोष्ठपंचकं
गात्रार्थंपीठपादार्थंविलोप्यमित्यर्थः नहिलोपादिति मध्यकोष्ठचतुष्टयात्समन्ततोलुप्तषोडश

नाड॰ कोष्ठात्मकं चतुरस्रं चक्रपीठं भवेत् समं चतुरस्रं मध्यकोष्ठचतुष्टयात्मकं हस्तमितं पद्मपीठं भवेत्
३२ मानसूत्रमिति एकतः एकस्मिन्ने सूत्रमर्थाद्नविंशत्यंगुलं व्यासार्धसूत्रं मध्ये पद्मपीठस्य नाभौ वाम
करेण रोप्यपीठे चक्रपीठे वहिः सर्वतः पंचांगुलानित्यत्वाद दक्षिणकरेण कठिनीभूतं भ्रामयेत्
तस्माद्भ्रामणादस्मिन्नष्टाचत्वारिंशदंगुले चक्रपीठे षट्त्रिंशदंगुलं मंडलं भवतीत्यर्थः चतुरस्र॰
इति षडंगुलचतुरंगुलव्याससार्धसूत्रयोस्तया पूर्ववद्भ्रामणेन पद्मदेशे कर्णिकार्थं केसरार्थं च चतु
रंगुलमष्टांगुलं कार्यमित्यर्थः षडंगुलानीति द्वादशांगुलव्यासार्धसूत्रभ्रामणेन पद्मदेशे प्रान्तलग्न
चतुर्विंशत्यंगुलं मंडलं कार्यं एतद्दलमूलभुवः केसरमंडलगतत्वाद्दलमध्याग्रयोः सिद्ध्यर्थं त
त्रापि पद्मदेशे अष्टांगुलकेसरमंडलात्परितो वशिष्टाष्टांगुलभुवः समं स्यादिति न्यायेन विभागात् ३२

षोडशांगुलं दलमध्यमंडलं चतुर्विंशत्यंगुलं च दलाग्रमंडलं इति कश्चित् तत्र पद्मक्षेत्रस्य समस्य षड्भा
दशांशो बहिः स्थितः तन्मध्येपि भजेद्वृत्तैस्त्रिभिः समविभागतः आद्यस्य कर्णिकास्थाने केसराण्यद्वि
यके तृतीये तत्र पत्राणि स्युः कोशेन दलाग्रकमिति शारदातिलकोक्तेः द्व्यंगुलस्यैव दलाग्रमंडलस्यावि
ततात् चचषडंगुलावशिष्टव्यासाविंशत्यंगुलं दलमध्यमंडलं सिध्यति नचैवं कर्णिकाकेसरदलमं
डलानामपि समांशत्र्यंगुलव्यापिनां शारदातिलकोक्तानामिह ग्रहणापत्तिः कर्णिकाकेसरमंडल
मानयोरिहोक्तयोरनाकांक्षाभावात् दलदलाग्रमानस्य तु उक्तेनाकांक्षायातद्व्यमे ग्रहणादिति दिक्
ततः इति पद्मक्षेत्रकर्तव्यानुरोधात् स्वचक्रपीठसूत्रार्धकेन षोडशधा विभजेदित्यर्थः तिर्यगिति विदि
क्सूत्रीतरकर्णिकाविवृत्तमंडलरेखां तत्स्वरणं त्वपीतेन सूत्रेणेति द्वितीयकेसरमंडले यथाक्रमे

ना॰उ॰ ३३ शुक्लादिरजसा केसराणि कुर्यादित्यर्थः दलसंधिगताग्रस्थपलक्षणं तेन कर्णिकाकेसरदलाग्रवक्राणि
रेखाउच्यन्ते दलानीति केसरमंडलोन्नादीरम्याष्टांगुलदीर्घाणि त्रिभिस्त्रिभिरारेखाभ्योमुखान्यर्थेवेदा
भान्यष्टौदलानिकृत्वातन्मध्ये षडंगुलानि सितरजसाप्रपूर्यपरिह्यंगुलंदलाग्राष्टकंलोहितरजसाक्रा
घमित्यर्थः दलान्तरालमिति मंडप्रपर्यन्तंसाग्रदलानांपरस्परमंतरालेत्रिकोणाभमित्यर्थः पद्मसे
ति रेखासमंदलाग्रमंडलतःपद्मपीठरेखापर्यन्तंपद्मावरणंतद्बहिःपीठंशुक्लं अन्तरमंमंडलरेखा
वदेकांगुलस्थले अतःपरमिति पंचभिर्वर्णैःसमुज्वलेत्कृतशोभंषोडशाग्रंवक्रंकृत्वातन्मध्येय
ववन्मध्यस्थलान्षोडशागान्श्यामादिवर्त्त्वर्णैश्चतत्रस्वतन्त्रेणालिखेत् रजोभिरिति आरेभ्योबहिर्य॰
थाक्रमसितादिपंचरजोभिःकृत्वैकांगुलोन्नतंप्रथमरेखातस्तत्रोत्तरंडर्वलास्तयासहपंचरेखालिखेदि ३३

त्यर्थः रजइति श्यामाद्बहिर्दिग्विदिक्क्रमेण विस्ताररेखारूपेण नानारजो देयमित्यर्थः रेखां वक्रपी
ठावरणार्थे वल्लीति चक्रपीठे यथावकाशं वल्ल्यादि यथाशोभं कार्यमित्यर्थः उपपीठं चक्रपीठाद्बा
ह्यकोष्ठपंक्तिद्वयरूपं भूषणप्रकारमाह ततइत्यादि तत्रेत्यर्थः गात्रकेपि चकोष्ठात्मकः पीठपाद
५० त्रमध्येयःसोमोराजाव्यवस्थितः शुक्लवर्णोगदाहस्तस्तस्मैसोमात्मनेनमइतिसोमं ७ सर्वदेवाधि
प्र॰ पोदेवईशानःशुक्लईश्वरः शूलपाणिर्वृषारूढोरुद्राधिपतयेनमइतीशानं ८ ॐपन्नगाधिपतिर्दे
वोयोनंतोनीलविग्रहः पातालवसतिर्नित्यमनंतायनमोनमइत्यनंतं ९ ॐपलाशकुसुमाकारोव्र

ना॰उ॰ स्नावेदाद्यस्त्रष्टक सर्वयज्ञपतिश्रेष्ठस्तस्मै नित्यं नमो नम इति पूर्ववद्ब्राह्मणं ग्रहमंडलमध्ये ब्रह्मजज्ञान
मित्यादिभिः स्थापनोक्तमंत्रैर्ब्रह्मशिवविष्णुकमलाविकायेवमूर्तानि प्रत्येकं पूर्ववत्स्थापयेत् ततः सू
९० र्यादिद्वात्रिंशद्देवताभ्यो दशलोकपालेभ्यश्च स्वस्वशाखीयैर्मंत्रैस्तेन तत्स्थानभूमौ बलीं दद्यात् तद्यथा
ॐ कस्मिन्नित्यादिमंत्रांते सूर्याय षगुडौदनबलिर्नमः बृहस्पतये षदध्योदनबलिर्नमः शुक्राय षघृतौद
नबलिर्नमः शनैश्चराय षकृसरबलिर्नमः राहवे षछागमांसबलिर्नमः केतुभ्यः षचित्रौदनबलिर्नम :
ततः सर्वेभ्यो घृतपायसबलिर्देयः ईश्वराय॰ उमायै॰ स्कंदाय॰ विष्णवे॰ ब्रह्मणे॰ इंद्राय॰ यमाय॰ कालाय
चित्रगुप्ताय इति नवाधिदेवताभ्यः अग्नये अद्भ्यः भूम्यै विष्णवे इंद्राण्यै॰ प्रजापतये सर्पेभ्यः ब्रह्मणे
इति नवप्रत्यधिदेवताभ्यः गणपतये दुर्गायै॰ वायवे॰ आकाशाय॰ अश्विभ्यां॰ इति पंचभ्यः एतेभ्यो घृत
पायसबलिः ऐंद्रादिदशलोकपालेभ्यो माषभक्तबलिं दद्यात् तद्यथा इंद्रस्त्वसहसादीमः सर्वदेवाधि ९०

यो महान् वज्रहस्तो महामतस्तस्मै नित्यं नमो नमः इंद्रायैष माषभक्तबलिर्नमः आग्नेय· पुरुषोर-
क्तः सर्वदेवमयोऽव्ययः धूम्रकेतुरनाधृष्यस्तस्मै नित्यं नमो नमः अग्नयेष· यमश्चोत्पलवर्णाभः कि-
रीटी दंडधृक् सदा धर्मसाक्षी विशुद्धात्मा तस्मै नित्यं नमो नमः निर्ऋतयेरा· वरुणः श्यावलो विस्नुः
पुरुषो निम्नगाधिपः पाशहस्तो महाबाहुस्तस्मै नित्यं नमो नमः वरुणायैष· वायुस्तु सर्ववर्णोऽपि स-
र्वगंधवहः शुचिः पुरुषो ध्वजहस्तश्च तस्मै नित्यं नमो नमः वायवेएष· गौरीयस्तु पुमान् सौम्यः
सर्वौषधिसमन्वितः नक्षत्राधिपतिः सोमस्तस्मै नित्यं नमो नमः सोमायैष ईशानः पुरुषः शुक्लः
सर्वविद्याधियो महान् शूलहस्तो विरूपाक्षस्तस्मै नित्यं नमो नमः ईशानायैषः निर्ऋतवरुणयोर्म-
ध्ये यो सावनंतरूपेण ब्रह्मांडं सचराचरं पुष्पवहारयेत्मूर्ध्नि तस्मै नित्यं नमो नमः अनंतायैष इंद्रेशा-
नयोर्मध्ये पद्मयोनिश्चतुर्मूर्तिर्वेदावासः पितामहः यज्ञाध्यक्षश्चतुर्वक्त्रस्तस्मै नित्यं नमो नमः इति

नाड.
६१
61

ब्रह्मणेएषमाषभक्तबलिर्नमः इति एतावता बलिदाने रूपनारायणीये अन्यत्र तु वरुणब्रह्मशिवविष्णुग
णपतिकमलाविकायेव भूतेभ्यो पितृभ्यो वैदिकैर्मन्त्रैर्नाममन्त्रैर्वा हुतपायसेन माषभक्ताभ्यां वा वलयोऽदे
देयाः ततः पूर्वदिशि मेडपोत्तररूपविष्टपगोमयोपलिप्तायां भुवि भूतेभ्यः पूजापूर्वकं माषभक्तबलिं दद्या
त् तद्यथा त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च ब्रह्मविष्णुशिवैः सार्द्धं रक्षां कुर्वन्तु तानि मे देवदा
नवगन्धर्वा यक्षराक्षसपन्नगाः ऋषयो मनवो गावो देवमातर एव च सर्वे मम माध्वरे रक्षां प्रकुर्वन्तु मुदा
न्विताः ॐ त्रैलोक्यस्थेभ्यः स्थावरेभ्यो भूतेभ्यो नमः ॐ त्रैलोक्यस्थेभ्यः स्थावरेभ्यो भूतेभ्यो नमः ॐ ब्र
ह्मणे नः विष्णवे नः शिवाय नमः देवेभ्यो दानवेः गंधर्वेः यक्षेभ्यो नः राक्षसेभ्यो पन्नगेभ्यो ऋषि
भ्यो नः मनुभ्यो गोभ्यो देवमातृभ्यो नमः इति पुष्पादिभिः पूजयित्वा एवमेव प्रत्येकं श्लोकपाठेन पुग
पद्यावलिं दद्यादित्यनुक्तं एवं पूजासमीपभूमौ बलिं दत्त्वा स यजमानश्चाचार्यश्च चरणौ क्षालयेत् ततः

प्रतिकुंडसमीपेतत्तद्धोतास्वस्वशाखीयैः पारकैर्वाग्रविरोपिभिः पौराणैरेभ्रमंत्रैः प्रतिकलशंमंत्रमाव
र्तयन् कलशत्रयमेकंवाकलशंस्थापयेत् तद्यथा स्थगवेदीकुंडेवाथवागोमयोपलिप्तदेशेधान्यादिकृ
तचतुष्केगैरिकहरिद्रादिरजसावातविंशतिदलंकमलंकृत्वातन्मत्रकर्णिकायांयवादीनामुपरिदृढंकल
मकालकंवहिर्दृथ्यद्वत्तनसूपितंकलशं ॐ ष्टपानिवकलशंइतिमंत्रेणस्थापयित्वाइमंमेगंगेइतितीर्था
दिवारिणाकिंचिदूनंपूरयेत् ततःप्रवोयत्तेषुदेवयेनइत्यस्यस्योडुंवरप्लक्षवटचूतपल्लवान् सहिरत्ना
नीतिकनकरजतमुक्ताराजपट्टप्रवालरूपंकनकहीरकमाणिक्यमौक्तिकनीलरूपंवारत्नपंचकं उ
६१ हृतासिवराहेणेत्यश्वस्थानगजस्थानरथ्यावल्मीकनदीसंगमहृदगोकुलस्थाः सप्तमृदः याओषधी
७३ रितिसर्वौषधीः गंधद्वारामितिगंधं गायत्र्यागोमूत्रं गंधद्वारेतिगोमयं आप्यायस्वेतिक्षीरं दधिक्रा
व्णइतिदधितेजोसिशुक्रमितिघृतं देवस्यत्वेतिकुशोदकंकांडात्कांडादितिदूर्वाः याःफलिनीरि

तिफलं कलशादि येन न हि तेदत्तेन सहोनमस्तु मिति पंचगर्भं स्तत्र वरुणं न्यस्य ॐ गंगाद्याः सरितः
ना० उ० सर्वाः सरांसि जलदा ह्रदाः सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः आयान्तु यजमानस्य दरितक्षय
६२ कारकाः श्रुख्याप्राभ्यो भास्करो गंगा नैमिषारण्यमेव च एतानि सर्वतीर्थानि घटेऽस्मिन्निवसन्तु मे सरस्वती
62 गंडकी च कौशिकी शरयूस्तथा एताश्च सरितः पुण्याः कलशे सन्तु मे सदा गंगे च यमुने चैव गोदावरि सर
स्वती नर्मदे सिंधु कावेरि घटेऽस्मिन्संनिधिं कुरु विंतिपौराणैरिमं मे गंगे आपो हि ष्ठेत्याभिश्च तीर्थानि न्यसेत्
पुवा सवा सा इति च स्नेण वेष्ट्य स्वर्णादर्वीति एवादिशाय वे मुखे न्यसेत् एवमाचार्य ऋत्विग्दीक्षान्ये च स्वस्वमे
त्रैः कलशस्थापने कुर्युः मेरुप्रतिष्ठोक्त कलशस्थापनदीत्या वा ततः पीतरक्तं वा मंगलसूत्रमादाय
ॐ येन बद्धो बली राजा दानवेन्द्रो महाबलः तेन त्वां प्रतिबध्नामि रक्षे मा चल मा चलेति ॐ यदाबध्नन्दाक्षाय
णा हिरण्यमिति च यजमानहस्ते आचार्यस्तद्धस्ते च यजमानोऽन्येषां च ऋत्विजां प्रमाणिकानां वान्येषां दक्षिण· ६२

ध्रुवोसि पृथिवीं दृंह ध्रुवक्षिदस्यन्तरि
क्षं दृंहाच्युतक्षिदसि दिवं दृंह। अग्नेः
पुरीषमसि।

हस्तेव श्रीपादाचारतश्चाचार्यैः ततश्चाचार्यैः पूर्वकुंडात्पूर्वतः पदत्रयमात्रां भुवं त्यक्त्वा यूपावटात्तृतीयांशगंभी
रंगर्तं खानयित्वा तत्राक्षतान्दर्भांश्च प्रक्षिप्योदकेन यूपं प्रोक्ष्य निखनेदिति रूपनारायणः। हरिद्रातैलाभ्यामभ्य
क्तं तीर्थोदकस्नापितं गोरसर्षपगोरोचनागुग्गुलुदूर्वानिंबपत्रगर्भां पोटलिकां वध्वा युवा सुवासा इति वाससा
वेष्टितमक्षगर्ते ध्रुवासीति निखनेदिति कश्चित्। भविष्योत्तरे तु यूपप्रतिष्ठा कर्तव्या वेदोक्तविधिना ततः कुंकु
मेन समालभ्य पुष्पैर्धूपैः समर्चयेत्। वस्त्रयुग्मेन संवेष्ट्य नैवेद्यादि यथाक्रममिति। अन्यत्र तु तडागोत्तरे तु नदी
शमेवा तन्मंडपयोर्मध्ये वा अधिवासनपूर्वकं यूपं निखनेत्। तथा यूपं कुंकुमेनाक्तांगं पुष्पैः प्रपूज्य वस्त्र
युग्मेनावेष्ट्य नैवेद्यं दत्वा लोकपालाष्टकं ब्रह्मविष्णुशिवान्यूपे पूजयेत्। यूपव्रस्का इति यूपं समालभ्य उच्छ्रयस्व
वनस्पत इत्युच्छ्रित्य यूपगर्ते दत्तपुष्पदर्भान्प्रक्षिप्य यूपमुदकेन प्रोक्ष्य निवेश्य ध्रुवासीति निखनेत् यज्ञायज्ञा
व इति मूले जलमभिषिच्य माषभक्तबलिं हरेत्। ॐ यस्मेहि धर्मध्वजयत्तनाथ त्रयोमयो वेदशरीर यूप विधायदे

यज्ञायज्ञा वो अग्न
ये गिरा गिरा च दक्षसे॥ प्रप्र वयममृतं जातवेदसं प्रियं मित्रं न शंसिषम्

यूपव्रस्का उत ये यूपवाहाश्चषालं ये अश्वयूपाय तक्षति। ये चार्व
ते पचनं संभरन्त्युतो तेषामभिगूर्तिर्न इन्वतु॥

ताडु
६२

वेश्वरयत्तरलोवलिंगहाणामसहंनमामि ह्रपायैषवलिनेमः ततःसोमः पवतेतिकुंकुमाक्सत्त्रेणावेष्टयप्र
र्वतेतिमेवादिपर्वतान्वरुणादिकपालोश्चपूपेगंधपुष्पैःप्रपूज्यकर्मान्तलिंगदेवरुणप्यान्तोदकमुखेः पठेत् देहि
मेनुग्रहस्रूपप्रसादंकुरुसुप्रभो मूलच्छेदेनयत्पापंभूमिघातेनयातकं यच्छेदरूपघातोत्थंस्रूपःपापंव्यपोहतु
63 यद्वाल्यंयच्चकौमारेयत्पापंवार्धकेकृते तत्सर्वंममदेवेशस्रूपःपापंव्यपोहतु यन्निशायांतथाप्रातर्यन्मध्याह्ना
परान्हयोः संध्ययोश्चकृतंपापंकर्मणामनसागिरा सर्वंतन्ममदेवेशस्रूपःपापंव्यपोहतु येनकेननिमि
त्तेनकर्मापापंतुकारयेत् तस्यपापेनलिप्तोगलेनैवास्पृश्यउच्यते ततोयाजेषयोरितिसूपेपुष्पमालांवध्या
ह्रपेप्रदक्षिणीकृत्यगाढमालिंगपुत्रपौत्रादियुतोनमस्कुर्यात् केचिदालिंगपस्रातात्यानिवासांसिधारयेदि
तिवदंति एतावत्सार्वंदेविकाम्यकर्मणिपिम्फलाभावाडपेदेप ततश्चाचार्यःचरणेक्षालयित्वाचमध्वारप्राप्तमुख्य
गंधादिनाप्रपूज्य पठध्वमितिप्रेषयेत् यजध्वमितिहोतृन्तु तत्कृष्टमंत्रजप्येनतिष्ठध्वमितिवजायकान्सर्वान्प्रेषयेत् ६२

ततश्चाचार्यश्चर्त्विजश्च स्वेस्वेकुंडे स्वस्वशाखोक्तविधिनाग्निप्रणानानंतरभाविकर्मकुर्युः ततः प्रतिकुंडमिध्मा
धानानंतरं यजमानश्चाचार्यकुंडप्रभृतिकुंडदक्षिणतउपविश्य सकुशयवंजलमादाय अद्येत्यादिस्रु
क्जलाघारायोत्सर्गकर्मणि इदंहविर्द्रव्यंवरुणादिविश्वकर्मान्ताभ्यः पूर्वोक्तसांगदेवताभ्यश्च होतव्यंमयात्य
क्तंनममेति प्रतिकुंडे द्रव्यत्यागंकुर्यात् बहुभिर्होतृभिर्होमे क्रियमाणे प्रत्याहुतित्यागस्यैकेनकर्तुमश
क्तेः ततोजापकैर्द्वारपालैश्च जपे क्रियमाणे होमः कार्यः तत्रादौ द्वारपालजप्यान्युच्यंते तानिचपठ
धमितिप्रैषेपदत्वेपठनीयानि तत्राग्नीसूक्ते पावमानेच सोमसूक्ते सुमंगले पूर्वाध्यायेचैंद्रसूक्तेरक्षो
घ्नेचेति बह्वृचो अग्निसूक्तं हिरण्यवर्णामितिपंचदशर्चं पावमानेस्वादिष्ठयामदिष्ठयेत्यादि सोमसूक्तेसो
ममाहेत्यादि सुमंगलेकनिक्रदज्जनुषमित्यादि तथाकुलेपूर्वाध्यायः शन्नइंद्राग्नीइतिवर्गत्रयंइंद्रसूक्ते र
योजातएवेत्यादि रक्षोघ्नेकृणुष्वपाजइत्यादि । दक्षिणतद्वारपालौरुद्रान्पुरुषसूक्तके श्राकाध्यायेसूक्ति

नाडु ६४

येच मंडलाध्यायमेवच रुद्रान्नमस्ते रुद्रेत्यादिमंत्रान् पुरुषसूक्तं सहस्रशीर्षेत्यादि श्लोकाध्याये देवसवि
तः प्रसुवयज्ञमिति विंशन्नममध्याये शुक्रियेऽवं वाचेप्रपद्यइति मंडलाध्याय आदित्यं वा एषयन्मंडलंते
तितैतिरीयेके प्रसिद्धः यदेतन्मंडलमिति मंडलब्राह्मणं वा रवामदेव्यं बृहत्साम ज्येष्ठसाम रथंतरं तथा पु
रुषसूक्तं च रुद्रसूक्तमतः परं आज्यदोहानि सामानि शांतिकाध्यायमेवच भारुंडानि च सामानि पश्चिमे साम
गौ स्थितौ वामदेव्यं कयानश्चित्र इत्यत्र विगीतं बृहत्सामिद्धि हवामह इत्यस्यां गीतं ज्येष्ठसाम मूर्द्धानं दिव इ
त्यस्यां गीतं रथंतरमभित्वा शूर नोनुम इत्यस्यां गीतं पुरुषसूक्तं सहस्रशीर्षा पुरुष इत्येतास्वगीतं रुद्रसू
क्तमा वो राजानमिति वर्गद्वये रुद्रसंहिताख्ये आज्यदोहानि देवव्रतानीत्येतानि शांतिकाध्याय अबोध्यग्नि
रित्यादि भारुंडसामानि इमं स्तोममित्यादृक्षु गीतानि ३ अथर्वांगिरसे नीलरुद्रैर्वापराजिते देवीवममयु
सूक्तंवरोधसे शांतिकाध्याये आथर्वणौ द्वारपालौ पठेतामन्तरे स्थितौ अथर्वणसूक्तं छंदोगाय बृहत्साम्नायेत्यादि ६४

64

अंगिरसेत्वंगिरसोजन्मानीत्यादि नीलरुद्रंत्वानदपत्रेषित्यादि अपराजितादेवीपरिवर्त्मेनीत्यादि मधुसूक्तं
मधुवाताऋतायत इत्यादि रौयसेत्वभमेध्यावाहृथिवीत्यादि शांतिकाध्यायः शन्नइंद्राग्नीभवतामित्यादि ४
अथजापकजप्यानि रात्रिसूक्तं वैरौद्रं च पावमानं सुमंगलं जपेत्तुः पौरुषं सूक्तं पूर्वतो वहवौष्टथक रात्रिसूक्तं
रात्रीव्यख्यदायतीत्यादि रौद्रंमारुद्रायतवसेकपर्दिन इत्यादि पावमानंस्वादिष्टयेत्यादि सुमंगलंकानिकदज्ज
नुषमिति पौरुषंसहस्रशीर्षेत्यादि १ शाक्तंरौद्रंचसौम्यंचकौष्मांडंजातवेदसं सौरसूक्तंजपेद्रंसेदद्धिणेन
यजुर्विदः शाक्तमाशुःशिशानइत्यादि इंद्रावोविश्वतस्परीत्यनुवाकोवा रौद्रंइमारुद्रायस्थिरधन्वनइतिषट्
वं सौम्यंसोमोयेनुमितिषट्वं कौष्मांडंयद्देवादेवदेलनमित्यकवनुष्टयं जातवेदसंपक्षाहदेतनुवाकः
सौरसूक्तयोदेवीरितिषट्वं रवैराजंपौरुषंसूक्तंसौपर्णंरुद्रसंहितो शैशवंपेवनियनंगायंज्येष्ठसामच
वामदेव्यंबृहत्सौम्यंरौरवंसरथंतरं गवांव्रतविकर्णंचरक्षोघ्नंचयशास्तथा गायेयुःसामगाराजन्याश्रिम

नाड॰
६५

द्वारमाश्रिताः वैराजं पिबा सोमममंदंतु त्वेत्यादि यो हवं पुरुहव्यव्रते सहस्रपणीर्वैत्यस्यां गीते सौपर्णं उद्वेदभिश्रु
तामघमित्यादीनि त्रीणि सामानि रुद्रसंहिताग्रावो राजानमित्यादि प्रोष्ठावे उद्गातेजातमंधस इत्यस्यां गी
ते पंचनिधनं वहस्पावीते वामदेव्यं कयानश्चित्रेति गायत्रं तत्सवितुरित्यत्र गीते ज्येष्ठसाम मूर्द्धानं दि
वइत्यादि वामदेव्यं कयानश्चित्रद्वतिगीते हहताससिहिहवामहइति सौम्यं सोमव्रते सं तेपयांसीति रौ॰
रवं पुनानः सोमेति रथंतरं अभित्वाशूरनोनुम इति गवांव्रते तेयन्वतप्रथमेऽग्निमीलइत्यनयो गीत्रसा॰
महद्ये विकर्णं विभ्राड्वृहदित्यत्र गीते रक्षोघ्नं अग्ने रक्षाणः अग्ने युक्ष्वाहीत्येतयोर्गीतं यशः वृहद्दिन्द्रा
येत्यत्र गीते इमल्लआथर्वणाश्चोन्नरतः शांतिकं पौष्टिकं तथा जपेयुर्मनसा देवमाश्रित्य वरुणं प्रभुं शा
न्तिकपौष्टिकानि शं न इंद्राग्नीत्यादीनि सर्वे ध्येते मनसा वरुणं ध्यायंतो जपेयुः सर्वैर्ध्येनैरेतज्जपांते स्व
प्राणीयवरुणसूक्तजपोपिकार्य इतिकश्चित् एतानि वैदिकप्रसिध्याग्राह्याणि होमानंतरं जापकजः ६५

प्यानि सर्वे जपेयुरिति कश्चित् अथ पूर्वकुंडे आश्वलायन शाखीयः ऋग्वेदिनो होमप्रकारः तत्राग्निप्रणयने
प्राकृते ततो गुरुणा मंडलले खनादौ यजध्वमिति प्रैषे नेकृते सोन्वाधानादि कुर्यात् तत्रान्वाधाने विशेषः आ
ज्यभागांतमुक्त्वा प्रधाने वरुणमष्टोत्तरशतसंख्याभिराज्याहुतिभिरुडंबरसमिद्भिश्च नवग्रहान् प्रत्येकम
ष्टाविंशतिसंख्याभिराज्याहुतिभिरर्कादिसमिद्भिश्च नवाधिदेवताः नवप्रत्यधिदेवताः पंचविनायकादीन्
इंद्रशिवमरुद्गणान् दशलोकपालान् विष्वक्कर्माणं च प्रत्येकमष्टाविंशतिसंख्याभिराज्याहुतिभिः पलाश
समिद्भिश्च यदेपशेषेण स्विष्टकृतमित्यादि इध्माधाने कृते ततः पूर्ववा पूर्वोयजमानकर्तृको द्रव्यत्यागः आज्य
भागांते प्रधानहोमः सवत्त्वा यामीति पंचभिस्त्वं नो अग्ने स त्वं नो अग्ने इति द्वाभ्यां इमं मे वरुणेत्येकेन त्यष्टभिर्वारुणै
र्मंत्रैः तत्राद्येश्वतभिश्चतुर्दशाहुत्या अन्त्यैश्चतुर्भिश्चतुर्दशाहुत्या अष्टोत्तरशतमाज्याहुतीर्दद्यात् ततस्तावती
रौडंबरसमिधश्चजुहुयात् तद्यथा तत्त्वा यामीति पंचवानां श्रुतः प्रोयावरुणस्त्रिष्टुप् आज्यहोमे विः समिद्धो

ताड़ः
६६

मेत उडुबरसमिद्धोमेविनियोगइतिप्रयोज्यं एवमग्रेपि ॐतत्त्वायामि १ तदिनत्के २ शुनःशेपोह्यहृत् ३
अवतेहेडः ४ उडुत्तमं ५ त्वन्नोअग्नेवरुणस्यवामदेवोग्नीवरुणौत्रिष्टुप् सत्वन्नोअग्नेवामदेवोग्नीवरुणौत्रिष्टु
प् इमंमेशुनःशेपोवरुणोगायत्री ८ ततःसूर्यादिनवभ्यःप्रत्येकमष्टाविंशतिमाज्याहुतीरर्कादिसमिधश्च
जुहुयात् तद्यथा आकृष्णेनहिरण्यस्तूपसविताऽत्रिष्टुप् आज्यहोमेअर्कसमिद्धोमेववि १ आप्यायस्वगोतम
सोमोगायत्री पलाशसमिधं २ अग्निर्मूर्द्धाविरूपोंगारकोगायत्री खदिरसमिधः ३ उद्बुध्यध्वंबुधःसौम्योऽनु
यस्त्रिष्टुप् अपामार्गसमिधः ४ बृहस्पतेअतियदर्योगृत्समदोबृहस्पतिस्त्रिष्टुप् अश्वत्थसमिधः ५ शुक्रःपाराशरःशु
क्रोद्विपदाविराट् उडुंबरसमिधः ६ शमग्निरग्निभिरिरिंविठिः शनिरुस्निक् शमीसमिधः ७ कयानोवामदे
वामदेवोराहुर्गायत्री दूर्वासमिधः ८ केतुंकृण्वन्मधुच्छंदाः केतवोगायत्री कुशसमिधः ९ अथाधिदेवतादि
भ्योविश्वकर्मातेभ्यःप्रत्येकमष्टाविंशतिमाज्याहुतीः पालाशसमिधश्चजुहुयात् अवकेवसिष्ठोरुद्रोऽनुष्टुप् ६६

आज्यहोमेपलाशसमिद्धोमेविः एवमग्रेपिविनियोगोज्ञेयः १ गौरीर्मिमायदीर्घतमाजगती २ यदक्रंदोदीर्घ
तमास्कंदस्त्रिष्टुप् ३ विश्वोदीर्घतमाविश्वस्त्रिष्टुप् ४ ब्रह्मयज्ञानेवामदेवोब्रह्मात्रिष्टुप् ५ इंद्रवीमधुच्छंदा इं
द्रोगायत्री ६ यमायसोमंयमोयमोऽनुष्टुप् ७ मोषुणोघोरः कण्वककालोगायत्री ८ उषोवाजेप्रस्कण्वउषस्त्रि-
ष्टुभोबृहती ९ अथप्रत्यधिदेवतानां अग्निंकाण्वोमेधातिथिर्विश्वगायत्री ४ इंद्रश्रेष्ठानिगृत्समदइंद्रस्त्रिष्टुप् ५
इंद्राणीवृषाकपिरिंद्राणीपंक्तिः ६ प्रजापतेहिरण्यगर्भः प्रजापतिस्त्रिष्टुप् ७ आयंगौः सार्पराज्ञीसर्पीगा
यत्री ८ ब्रह्मयज्ञानेगौतमोवामदेवोब्रह्मात्रिष्टुप् ९ अथविनायकादिदेवानां गणानांत्वागृत्समदोग
णपतिर्जगती १ जातवेदसेकश्यपोदुर्गात्रिष्टुप् २ तववायोव्यश्वआंगिरसोवायुर्गायत्री ३ आदिद्धत्सा
आकाशेगायत्री ४ एषोउषाप्रस्कण्वोऽश्विनौगायत्री ५ अथेंद्रादित्रयस्यत्रातारमिंद्रंगर्गइंद्रस्त्रिष्टुप् १ त

ताड़ ६७

मोशानेगौतमर्ईशानोजगती २ सहतीयस्याहगणोमहतोगायत्री ३ अथलोकपालानां त्रा
तारमिंद्रंत्रिष्टुप् अग्निहतंमेधातिथिरग्निर्गायत्री यमायसोमंयमोयमोनुष्टुप् मोहूणोवारुक
एयोनिर्ऋतिर्गायत्री तन्नोअग्नेवामदेवोवरुणस्त्रिष्टुप् नववायोव्यश्वोवायुर्गायत्री सोमोधेनुंग
गौतमः सोमस्त्रिष्टुप् तमीशानंगौतमर्ईशानोजगती सहस्रशीर्षानारायणोनंतोनुष्टुप् ब्रह्म
यज्ञानंगौतमोवामदेवोब्रह्मात्रिष्टुप् ९ विश्वकर्मन्हविषाभौवनोविश्वकर्मात्रिष्टुप् १ एवंवरु
रुणादिविश्वकर्मांतसमवतारिंशद्देवताभ्यआज्यंसमिधश्चहुत्वायदस्यकर्मणइतिस्विष्टकृद्धोम
माज्येनकृत्वाइध्मसंनहनहोमादिपूर्णाहुत्यंतः प्राचीनंकर्मकुर्यात् अथमाश्वलायनशाखानुसा
रेणहोमविधिः पूणांत्वायनाधेस्तनतद्धात्वोकोग्राह्या अथदेदक्षिणकुंडेमाध्यंदिनीयोयजुर्वेदिनो

घा
होमविधिः तत्राग्निप्रणयनेप्राकृतमितिब्रह्मोपवेशनांद्याज्यभागांते कृताप्रधानहोमः कार्यः अत्रापि
कुंडदक्षिणोपविष्टोयजमानश्चाघारहोमात्प्राग्वरुणादिभ्यउत्करीत्याहविस्त्यजेत् आचार्योवाज्यभा
गोहुत्वा 'इममेववरुणइतिचत्वारः अयाश्चाग्ने येतेशतं अदितासत्वक् वनेषुवि उदुत्तमं वरुणस्योत्तंभ
नं निषसाद हृतवतीभुवनानामितिद्वादशभिर्मंत्रैः स्वाहांतैर्नवधावर्तितैरष्टोत्तरशतमाज्याहुती
स्तावतीश्चोदुंबरसमिधोवरुणायजुहुयात् तद्यथा इममेशुनःशेपोगायत्रीवरुणः आज्यहोमेविःस
मिद्धोमेत्वउदुंबरसमिद्धोमेविः इतिप्रयोज्यं एवंसर्वत्र ओं इमंमे १ तत्वायामिशुनःशेपस्त्रिष्टुब्वरुणः २
तन्नोअग्नेवरुणस्यवामदेवस्त्रिष्टुब्. ३ वनेषुव्यंत ४ अयाश्चाग्नेप्रजापतिःपंक्तिर्व. ५ येतेशतंशुनःशे
पस्त्रिष्टुप्. ६ वरुणस्योत्तंभनमभितपनसूर्योजगतीव. ७ निषसादशुनःकृत्स्नाजिनात्रिष्टुब्. ८ उदुत्त
मेशुनःशेपस्त्रिष्टुब्, शेपोगायत्रीव. ११ हृतवतीभरद्वाजोजगतीव. १२ एवंद्वादशमंत्राणामेकैकस्यन

वाहृन्नयत्र्यग्नेशोन्नरपूान माहृतयास्मावेत्स्योड्ंवरसमिथोहोमन्वः अथग्रहेभ्यः प्रत्येकमष्टाविंशतिमा-
ना॰उ॰ ज्याहुतीरर्कादिसमिधश्च जुहुयात् तद्यथा आकृष्णेनहिरण्यस्तूपास्त्रिष्टुप्सविता कपिलाग्राव्याज्यहोमेर्क-
९८ समिद्धोमेचविः एवमग्रतरत्र १ इमंदेवावरुणोयजुः सोमः पिंगलाग्नौ इमंदेवाः नाराजा अग्निर्मूर्धा विरू-
68 पाक्षोगायत्र्यंगारकः धूम्रकेत्वग्नौ ३ उद्बुध्यस्वपरमेष्ठीत्रिष्टुब्बुधः जाठराग्नौ ४ बृहस्पतेगृत्समदा-
स्प त्रिष्टुब्बृहस्पतिः शिखाग्नौ ५ अन्नात्परिस्रुतः प्राजापत्यश्चिसरस्वतींद्राजगतीशुक्रः हाटकाग्नौ ६ शन्नोदे-
वीदध्यङ्ङाथर्वणोगायत्रीशनिः महातेजस्यग्नौ ७ कयानोवामदेवोगायत्रीराहुः हुताशनाग्नौ ८
केतुंमधुच्छंदागायत्रीकेतवः रोहिताग्नौ ९ अथाधिदेवतादिभ्यो विश्वकर्मातेभ्यः प्रत्येकमष्टाविंशा-
तिराज्याहुतयः पलाशसमिधश्च त्र्यंबकंवसिष्ठोनुष्टुप्रुद्रः प्रणीतोदकस्पर्शः १ श्रीश्चतेस्वनरनाराय-
णस्त्रिष्टुब्उमा यदक्रंदोभास्करजमदग्निर्दीर्घतमसस्त्रिष्टुप्स्कंदः ३ विष्णोरराटमुतथ्योयजुर्विष्णुः ९८

विस्रो॰ वेत्रा ४ अब्रह्मप्रजापतिर्यजुर्ब्रह्मा अग्नि॰ त्यतां ५ सजोषाविश्वामित्रस्त्रिष्टुबिंद्रः ६ अस्तियमोभा
स्करजमदग्निर्दीर्घतमसस्त्रिष्टुब्यमः प्रणीतोदकस्पर्शः ७ कार्षिरसिदध्यङ्ङाथर्वणोनुष्टुप्कालः प्रणी
तोदकस्पर्शः ८ चित्रोवसोवृद्धयोजगतीचित्रगुप्तः ९ अथप्रत्यधिदेवतानां अग्निंदूतंविरूपोगायत्र्य
ग्निः १ अप्स्वंतर्बृहस्पतिः पुरउष्णिगापः २ स्योनामेधातिथिर्गायत्रीपृथिवी ३ इदंविष्णुर्मेधातिथिर्गायत्री
विष्णुः ४ त्रातारंगार्ग्यस्त्रिष्टुबिंद्रः ५ अदितिर्द्यौरास्त्वादध्यङ्ङाथर्वणोयजुरिंद्राणी अदितिः॰ स्त्रीषः ६ प्र
जापतेवरुणस्त्रिष्टुप्प्रजापतिः ७ नमोस्तुसर्पेभ्योदेवाअनुष्टुप्सर्पाः ८ ब्रह्मजज्ञानंप्रजापतिस्त्रि
ष्टुप्प्रजापतिः ९ अथविनायकादिपंचानां गणानांत्वाप्रजापतिर्यजुर्गणपतिः गण॰ मम १ अंबेअं
बिकेप्रजापतिरनुष्टुब्दुर्गा रवानोवागंधर्वाउष्णिग्वातः २ उदीरयस्वप्रजापतिरनुष्टुब्वाकाशः ४ अ
श्विनोरश्वोयजुरश्विनौ अश्विनौर्भैषज्येन ५ अथेंद्रादित्रयस्यत्रातारंगार्ग्यस्त्रिष्टुबिंद्रः १ अवनतस्य

पूर्वकमलात्केरेतुमानान्पित्य स्वस्थाने
प्रातरग्निरितिमन्त्रः

हूतं

ॐः परमेष्ठी त्रिष्टुब्रुद्रः प्रणीतोदकस्पर्शः २ महतो यस्य गौतमो गायत्री मरुतः ३ अथ लोकपालानां त्रातारं
ना० उ० गार्ग्यस्त्रिष्टुब्विंद्रः १ अग्निर्विरूपो गायत्र्यग्निः २ असि यमो भार्गव जमदग्निर्दीर्घतमस त्रिष्टुब्यमः प्रणीतोद
८९ कस्पर्शः ३ एष ते वरुणो यजुर्निरृतिः एष ते निरृते॰ घस्व प्रणीतोदकस्पर्शः ४ इमं मे शुनःशेपो गाय
त्री वरुणः ५ आ नो वायो गायत्री वाउग्निर्वातः ६ वयं सोम वेपुर्गायत्री सोमः ७ तमीशानं गौतमो जगतीशानः
प्रणीतोदकस्पर्शः ८ नमोस्तु सर्पेभ्यो देवा अनुष्टुब्वनेतः ९ ब्रह्मप्रजापतिस्त्रिष्टुब्ब्रह्मा १० विश्वकर्म
न्हविषा भौवन त्रिष्टुब्विश्वकर्मा ११ एवं समवतान्दिशादेवताभ्य आज्येन समिधश्चोक्तसंख्यया हुत्वा व्याहृ
तिहोमाद्यग्नये स्विष्टकृते स्वाहेति न देते पूर्णाहुतिनः प्राचीनं कर्म कुर्यात् अथ पश्चिमकुण्डे कौथुमशा
खीयः सामवेदिनो होमविधिः तत्राग्निप्रणयनोन्तस्पर्शं कृत तत्रान्तं इन्धनं तस्मीसमीहोमादिव्याहृतिहोमा
न्तं पूर्वोक्तं कुर्यात् अत्रापि व्याहृतिहोमात्प्राक् कुण्डदक्षिणे यविष्ठाय यजमानो द्रव्यत्यागं पूर्ववत् कुर्यात् अथ ८९

उदुत्तमं

प्रधानहोमः तत्रइमंमे वृतवतीभुवनानामितित्रिभिर्मंत्रैः षडिंशाद्वारमाहुतैरहोमस्तत्रा तमाज्याहुतीरुदुं
वरसमिधश्चवरुणायजुहुयात् तद्यथा इमंमेशुनःशेफोगायत्रीवरुणः आज्यहोमेवि० एवंमुडुंवरसमि
द्धोमविनियोगइति १ उदुत्तमंगौतमस्त्रिष्टुब्वरुणः २ घृतवतीभरद्वाजोजगतीवरुणः ३ अथग्रहेभ्यः प्र
त्येकमष्टाविंशतिमाज्याहुतीरर्कादिसमिधश्चजुहुयात् तद्यथा उदुत्यंप्रस्कण्वोगायत्रीसूर्यः आज्यहो
मे: अर्कसमिद्धोमेचवि० एवमुत्तरत्र १ संतेपयांसिगायत्रीसोमः २ अग्निर्मूर्द्धावरुणोगायत्रीभौमः ३ अग्ने
विवस्वन्मेरोजमदग्निर्बृहस्पतीबुधः ४ बृहस्पतेपरिदीयाः प्रतिरथस्त्रिष्टुप्बृहस्पतिः ५ शुक्रंतेभरद्वा
जस्त्रिष्टुप्शुक्रः ६ शन्नोदेवीस्त्रिपुष्टीयोगायत्रीशनिः ७ कयानोवामदेवोगायत्रीराहुः ८ केतुंकृण्वन्म
धुछंदोगायत्रीकेतवः ९ अथाधिदेवतादिभ्योविश्वकर्मातेभ्योऽष्टाविंशतिराज्याहुतयः पलाशसमिधश्च
प्रत्येकंहोतव्याः आवोराजानंवामदेवस्त्रिष्टुप्रुद्रः १ आपोहिष्ठासिंधुद्वीपोगायत्र्युमाऽस्योनापृथिवीमेधा

नारु.
७०

त्रिथिरस्त्रिककुमारः ३ इदं विष्णुर्मेधातिथिर्गायत्री विष्णुः ४ तमित्सप्रथा गोतमो बृहती ब्रह्मा ५ इंद्रमिदे
वतातय उष्णिक्त्रिष्टुबिंद्रः ६ आयंगौः सार्पराज्ञी गायत्री यमः ७ ब्रह्मजज्ञानं ब्रह्मा त्रिष्टुप्कालः ८ विश्वइत्त्रि
ष्टुग्विश्वगुणो जगती विश्वगुणः ९ अथ प्रत्यधिदेवतानां अग्निं दूतं भरद्वाजो गायत्र्यग्निः १ उदुत्तमं त्रिष्टुब्वापः २ पृ
थिव्यंतरिक्षं विष्णुहारिलिकः पृथिवी ३ सहस्रशीर्षा नारायणोऽनुष्टुब्विष्णुः ४ इंद्रायेंद्रो वृषाहयी गायत्री इंद्रः ५
एकाहकाषिमिष्टत्रिष्टुबिंद्राणी ६ प्रजापते नत्वद्धिरण्यगर्भस्त्रिष्टुप्प्रजापतिः ७ तवेदिंद्रावमं वसिष्ठस्त्रिष्टु
प्सर्पाः ८ एष ब्रह्मा प्रजापतिर्द्विपदा गायत्री ब्रह्मा ९ अथ विनायकादिपंचानां आतूनो गौरिवीतो गाय
त्री गणपतिः १ इमं स्तोमं कुत्सो जगती दुर्गा २ प्राणा शिशुर्विंद्रउशिग्वायुः ३ आदित्प्रत्नस्य नियनकामो
गायत्री आकाशः ४ एषोउषा उषा गायत्र्यश्विनौ ५ अथेंद्रादित्रयस्य त्वामिद्धि भरद्वाजो बृहतींद्रः आत्वा
सोमस्य सोमो बृहती श्वरः २ पवमाना असृक्षत आदरस्मो गायत्री मरुतः ३ अथ लोकपालानां त्वामिद्धि ७०

भरद्वाजोबृहतीन्द्रः १ अग्निर्होत्राणिश्रौतोगायत्र्यग्निः २ नाकेसुपर्णयमस्त्रिष्टुप्यमः ३ वेन्याह्लादित्यउष्णिक्नि
र्ऋतिः ४ इमंमेपुष्कलोगायत्रीवरुणः ५ वातआवातप्रतीचोनेउत्त्वाप्रेगातोगायत्रीवायुः ६ स्वादिष्टयापाग
मीरोगायत्रीसोमः ७ तद्वोगायसुतेतद्वोगायत्रीसोमः ८ समानोअधाउशनात्रिष्टुब्वनेनः ९ ब्रह्मय
ज्ञानंब्रह्मात्रिष्टुप्ब्रह्मा १० विश्वकर्मन्हविषाभोवनस्त्रिष्टुब्विश्वकर्मा ११ एवमपिदेवतादिभ्योविश्वकर्मा
न्तेभ्यः प्रत्येकमाज्याहुतीः पलाशसमिधश्चाष्टाविंशतिसंख्ययाजुहुयात् अथस्विष्टकृदनआहुतिहोमा
दिवर्हिर्होमांतेपूर्णाहुतिततःप्राचीनंकर्मकुर्यात् अथोत्तरकुंडेशौनकशाखीयोऽथर्ववेदिनोहोमविधिः
तत्राग्निप्रणयनंपूर्ववत्कृतमितितडतरेममाग्नेवर्चइतिमंत्रेणसमिधश्चयहोमादिसप्तदशाहुत्यात्मकोभ्याः
तानहोमांतंकुर्यात् आत्राज्यभागयोःपूर्वंयजमानोद्रव्यत्यागंपूर्ववत्कुर्यात् अथप्रधानहोमः तत्र
अप्सुतोयाम्नायाम्नः उडतमं प्रास्मत्पाशानितिवरुणर्भिः प्रत्येकंसप्तविंशतिवारमाहुत्याऽष्टोत्तरशतं

ना०ड० माज्याहुतीर्बृंहणायपञ्चतातावतीरुड्डेवरसमिधोजुहुयात् तद्यथा अग्नेतेऽथर्वानुष्टुप्बृंहणे आज्यहो
मेविः एवमुड्डेवरसमिद्धोमेविः १ यांमेत्रायामेत्राराजेत्यथर्वापङ्क्तिर्बृंहणः २ उड्डतममथर्वात्रिष्टुप्बृंहणे ३
प्रासमत्यापघ्नानथर्वात्रिष्टुप्बृंहणे ४ अथग्रहेभ्यः प्रत्येकमष्टाविंशतिमाज्याहुतीरर्कादिसमिधश्चजुहु
यात् तद्यथा विषासहिमथर्वाजगत्यादित्यः १ शाकेधूममथर्वानुष्टुप्सोमः २ तयामन्योब्रह्मात्रिष्टुबङ्गा
रकः ३ यद्राजानोविभजंतविष्णुः पंक्तिर्बुधः ४ बृहस्पतिर्नोब्रह्मात्रिष्टुप्बृहस्पतिः ५ शुक्रोऽस्यथर्वानु
ष्टुप्शुक्रः दसहस्रबाहुर्नीसयणेनु० शनिः ७ दिवंचित्रंकौशिकस्त्रिष्टुप् राहुः ८ यस्तेदुष्टुरथर्वात्रिष्टु
प्केतवः ९ अथाधिदेवतादिभ्यः आज्यंपलाशसमिधश्चाष्टाविंशतिसंख्ययाहोतव्याः मानोविदन्
ब्रह्मानुष्टुब्विश्वेः १ आपोहिष्ठासिंधुद्वीपोगायत्र्युमा २ अग्निरिवमन्योब्रह्मात्रिष्टुप्स्कंदः ३ प्रतद्विष्णु
रथर्वागायत्रीविष्णुः ४ ब्रह्मजज्ञानमथर्वात्रिष्टुब्ब्रह्मा ५ इंद्रंममब्रह्मानुष्टुप्विंद्रः ६ यः प्रथमोब्रह्मा ७१

त्रिष्टुब्यमः ७ रोहितः कालोऽथर्वानुष्टुप्कालः ८ यदाज्ञातं कौशिकोऽनुष्टुप् चित्रगुमः ९ अथ प्रत्यधिदेवतानां स
मास्त्वाग्ने ब्रह्मा त्रिष्टुबग्निः १ शन्नो देवी ब्रह्मा गायत्र्यापः २ भूमेमातर्ब्रह्मानुष्टुब्भूमिः ३ इदं विष्णुरथर्वा गा
यत्री विष्णुः ४ इंद्रं जुषस्व ब्रह्मानुष्टुबिंद्रः ५ प्रेतपादावथर्वानुष्टुन्नक्षं जनतास्यथर्वानुष्टुप्प्रजापतिः ७ स
र्पान्तु सपार्थिवाः पंक्तिः सर्पाः ८ येदिशाय सर्वा त्रिष्टुब्ब्रह्मा ९ अथ विनायकादिदेवतानां· निर्लक्ष्मद्रविणि·
दानुष्टुब्विनायकः १ पृतनाजितमथर्वा त्रिष्टुब्दुर्गा २ अंतरिक्षे वायवे ब्रह्मानुष्टुब्वायुः ३ प्राणं तेऽथर्वा त्रि
ष्टुब्वाकाशः ४ सवेन्नयाथोगिरोऽनुष्टुबश्विनो ५ अथेंद्रादिनवस्य इंद्रमिंद्र वर्धय ब्रह्मा त्रिष्टुबिंद्रः १ मा
नो विदन्ब्रह्मा त्रिष्टुबग्निः २ यमो मृत्युर्ब्रह्मा त्रिष्टुब्यमः ३। मारुतो मन्त्राथर्वा त्रिष्टुप्मरुतः ३ अथ दिक्पा
लानां इदमिंद्र ब्रह्मा त्रिष्टुबिंद्रः १ अग्नेर्मन्वे ब्रह्मा त्रिष्टुबग्निः २ यमो मृत्युर्ब्रह्मा त्रिष्टुब्यमः ३ अभितं निर्ऋ
तिरथर्वानुष्टुप्निर्ऋतिः ४ येपश्चाज्जुहत्यथर्वा त्रिष्टुब्वरुणः ५ वायोः सवितरथर्वा त्रिष्टुब्वायुः ६ यउत्तर

ना० इ.
७२
72

तोब्रह्मात्रिष्टुप्सोमः ७ यानादददातेगिरागायत्रीपूषानः ८ अग्नेतेविततमथर्वापंक्तिरनेतः ९ ब्रह्मापते
युज्यतामथर्वात्रिष्टुब्ब्रह्मा १० यैत्रिपमावावस्पतिस्त्रिष्टुब्विश्वकर्मा ११ एवंसप्तचत्वारिंशद्देवताभ्यआज्यंसमि
धश्चहुत्वाअभ्यातानहोमादिसंस्रावभागहोमांतेपूर्णाहुतिंततःप्राचीनंकर्मकुर्यात् आचार्यस्त्वस्वशाखो
क्तविधिनाएवमेवैताभ्यःस्वकुंडेहुत्वापूर्णाहुतिंततःप्राचीनंकर्मकुर्यात् शाखांतरस्थाहोमविषयोविस्त
रभयान्नोक्ताःस्वयंज्ञेयाः एवंरात्रौवधिवासनंविधायाचार्यःकुंडसमीपस्थापितकलशेषुसर्वेषुगजस्था
नाश्वस्थानरथ्यावल्मीकनदीसंगमह्रदगोकुलचत्वराणामहोमृदः तथारोचनीश्वेतसर्षपाश्चकुंकुमं
कर्पूरचंदनागरुकस्तूरीजातीफलमल्लादीन्यथासंभवंत्रीनांधान्यगुग्गुलेचक्षिपेत् वेतसाश्वत्थोदुंबरपल
ल्लववटपल्लवांश्चकलशाग्रेविन्यसेत् ततःपश्चिमकुंडपश्चिमेपत्नीपुत्रादिसहितंप्राङ्मुखोपविष्टयजमानंप्रत्य
ङ्मुखोवाउदङ्मुखोवागत्वार्त्विजःकुंडसमीपस्थकलशोदकेनाचार्यश्चद्वारकलशोदकेनकलशाग्रावस्थपल्लव ७२

पल्लवैर्मंगलतूर्यगीतघोषैर्नेवर्त्तमाने स्वस्वपुण्याहवोक्तमंत्रैरभिषिंचेयुः पौराणैश्चैतैर्यथा सुरास्त्वामभिषिंचंतु ब्र
ह्मविष्णुमहेश्वराः वासुदेवो जगन्नाथस्तथा संकर्षणो विभुः प्रद्युम्नश्चानिरुद्धश्च भवंतु विजयाय ते आखंडलो
ग्निर्भगवान्यमो वै निर्ऋतिस्तथा वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः ब्रह्मणा सहिताः सर्वे दिक्पालाः पा
न्तु ते सदा कीर्त्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः बुद्धिर्लज्जा वपुः शान्तिस्तुष्टिः कान्तिश्च मातरः एता
स्त्वामभिषिंचंतु देवपत्न्यः समागताः आदित्यश्चंद्रमा भौमो बुधजीवसितार्कजाः ग्रहास्त्वामभिषिंचंतु राहु
केतुश्च तर्पिताः देवदानवगंधर्वा यक्षराक्षसपन्नगाः ऋषयो मनवो गावो देवमातर एव च देवपत्न्यो द्रुमा
नागा दैत्याश्चाप्सरसां गणाः अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि च ओषधानि च रत्नानि कालस्या
वयवाश्च ये सरितः सागराः शैलास्तीर्थानि जलदा नदाः एते त्वामभिषिंचंतु सर्वकामार्थसिद्धये इति एव
मभिषिक्तं सर्वकलशोदकैर्यजमानं स्नपयेयुः एतावद्वाविकाणं द्वितीयदिने प्रभाते भिषेक इति हेमाद्रिः

पनारायणादयः ततो यजमानगुर्वादयो रात्रिशेषं तत्रैव पुराणश्रवणगीतश्रवणादिना तिष्ठेयुः उ
ताड॰ पवासं च कुर्युः अपः क्षीरं हविष्यमश्नीयुः ततः प्रातः स्नानादिनित्यक्रियां कुर्युः ततो यजमानः शुक्ला
७३ माल्याम्बरधरः शुक्लगन्धानुलेपनः क्षालितकरचरणः स्वाचान्तो मण्डपोत्तरैशान्यां दिशि सकुशपीठा
73 सने प्राङ्मुख उपविश्य उदङ्मुखोपविष्टेभ्यो गुर्वृत्विग्भ्यः क्षालितपाणिपादेभ्यः स्वाचान्तेभ्यो गवां शतमष्ट
षष्टिं वा पञ्चाशतं वा षड्विंशतिं वा पञ्चविंशतिं वा यथाशक्ति दक्षिणां दद्यात् तद्यथा अद्येत्यादि कर्त्रैवामुक
जलाशयोत्सर्गाङ्गभूतं कृतं तदधिवासनकर्मप्रतिष्ठासिध्यर्थंऽमुकामुकगोत्रेभ्योऽमुकामुकवेदशाखा
ध्यायिभ्योऽमुकामुकशर्मभ्यो गुर्वृत्विग्भ्य इमाः शतमष्टषष्टिः पञ्चाशत् षड्विंशति पञ्चविंशतिर्वा गाः रुद्रदे
वत्या दक्षिणाममुकगोत्रोऽमुकशर्माहं युष्मभ्यं संप्रददे न मम इति सयवकुशजलं वरणक्रमेण गुरुक
ग्रयः स्थितो नानाकरणां सर्वेषां करेषु युगपत् क्षिपेत् गवामभावे निष्क्रयत्वेनेदं द्रव्यं संप्रददे इति द्रव्यं ७३

दद्यात् तेन च स्वकीयास्ताभ्यो गाः पुच्छेषु प्रतिगृह्य स्वस्वशाखीयां कद्रुद मित्यादिकां सर्वे कामसस्तु ति पठेयुः ततो य
जमानेन कर्मांगदेवताः प्रीयतामित्युक्ते प्रीयतामिति वदेयु ततो ज्योतिर्विद्भ्यो कोषु शुभलग्ने कनकशृंगादि
भूषितां शोभनां गां गोयथादिना प्रत्यग्ब्राह्मणैः शांतिपाठे परमंगलगीतवाद्यघनैः क्रियमाणे रथवतीस
स्वव सिष्ठ ऋषिर्विस्तुगौर्वा देवता त्रिष्टुप्छंदः जलाशयजले गोरवतारणे विनियोगः ओं इरावती धेनुमती
इयवती येनुमती हि भूत्वं सूयवसिनी मनवे दशस्या व्यस्कभ्नाद्रोदसी विष्णवेते दाधर्थ पृथिवीमभितो
मयूखैः स्वाहा अनेन जले गामीशानदिगभिमुखीमवतारयेत् तारनीतां गामनुमंत्रेण ओं इदं सलिलं
पवित्रं कुरुध्वं शुद्धाः प्रजा अमृताः संभवन्ति से मोतारयंतीकुरुतीर्थाभिषेकं लोकालोकं तरते तीर्यते वे
ति वापीकूपयोत्सर्गे तु गोविरूप परिभ्रामयेदिति विश्वकर्मोक्ते प्रतिष्ठाकांडे भिहितमिति हृपनारायणः
ततो यजमानश्चाचार्यान्वारब्धः पुत्रादियुतोपीति केचित् गोपुच्छाग्रेलग्नो जले गच्छेत् समुद्राद् ऊर्मिः

ताड. ७४ 74

त्यस्यवामदेवोगोत्रेष्टुप्छन्दजपे विनियोगः ओंसमुद्रादूर्मि येवामित्यस्यवसिष्ठः सर्पोनुष्टुप्छन्दजपे विनियो
गः येवामीरोचने दिवः सिद्धुमा ॥ उदारडपाध्व सुनासममृतत्वमानट् हृत्तस्य नामगुह्यंयदस्ति जिह्वा
देवानाममृतस्यनाभिः येवामीरोचने दिवोयेवासूर्यस्यरश्मिषु येवामप्सुसदस्कृतंतेभ्यः सर्पेभ्यो नमः इ
तिमन्त्रद्वयंपठेत् ततईशान्यांपरयारेगताजानुदक्षेजलेउदङ्मुखोगोः कुशेष्टुरुणान्वितोयजमानः सकुशै
र्यवतिलैः स्वशाखोक्तरीत्यादेवर्षिपितृणांतर्पणंकुर्यात् तत्रप्राङ्मुखोदेवान्उदङ्मुखऋषीन्दक्षिणाभि
मुखः पितॄंस्तर्पयेत् ततः पौराणमन्त्रैरपितर्पणंकेचिदाहुः यथा पितापितामहश्चैवतथैवप्रपिता
महः स्वस्वपत्नीसमेतास्तेप्रीयन्तांजलतर्पणात् येजातदंतायेकेचिद्येचगर्भेव्यवस्थिताः तेषामुद्धरणार्था
यतडागोदकतर्पणं पितृवंशकाश्चयेस्माकंभ्रातरश्चसहोदराः गुरवोमातुलाःपुत्राः आचार्याःसखिवोयवा
तेषांपुत्राश्चपत्न्यश्चश्वशुरायेसपुत्रकाः एतेषांप्रीणनार्थायतडागोदकतर्पणं वंधुवर्गाश्चयेकेचिद्भ्रात ७४

नामविवर्जिताः स्वगोत्राः परगोत्रा वा तेभ्यश्चेदं तिलोदकं उद्बंधनमृता ये वै विषशस्त्रहताश्च ये दंष्ट्रिभिः
शृंगिभिश्चैव तेभ्यश्चेदं तिलोदकं अग्निदग्धाश्च ये केचिन्नाग्निदग्धास्तथापरे विद्युच्चौरहता ये च तेभ्यो लीदं ति
लोदकं असुरा देवपत्न्यश्च मातरश्चंडिकास्तथा दिक्पाला लोकपालाश्च ग्रहा देवाधिदेवताः तेषामुद्धर
णार्थाय तडागोदकतर्पणं रौरवे वान्धतामिस्रे कुंभीपाके च ये गताः अनेकयातनासंस्थाः प्रेतलोकेषु ये
गताः पंचत्वे ते च यस्मिन्या ये ये नीता यमकिंकरैः असिपत्रवने घोरे तेभ्योपीदं तिलोदकं विश्वेदेवास्तथा
साध्या आदित्याश्च मरुद्गणाः क्षेत्रपीठोपपीठानि नद्यश्चैव ससागराः पाताले नागपत्न्यश्च नागाश्चैव सप
र्वताः पिशाचा गुह्यकाः प्रेता गणा गंधर्वराक्षसाः पृथिव्यापश्च तेजश्च वायुराकाशमेव च ते सर्वे तृप्ति
मायान्तु तडागोदकतर्पणात् पितृवंशे मृता ये च जात्यंधाः पंगवस्तथा विरूपा आमगर्भाश्च ज्ञाताज्ञा
ताः कुले मम तेभ्यो दत्तं तडागस्य जलमेतत्सुतृप्तये आब्रह्मणो ये पितृवंशजाता मातुस्तथा वंशभवा

ता॰ ७५ मदीयाः वंशद्वये ये मम दासभृत्यास्तथैवाश्रितसेवकाश्च मित्रासमसखाः पशवश्चवृक्षादृष्टाश्चदृष्टा
श्चकृतोपकाराः जन्मांतरे ये मम संगताश्च तेभ्यस्तथैवोदकमेतदस्तु अतीतकुलकोटीनां सप्तद्वीपनिवासि
नां आब्रह्मभुवनाल्लोकादिदमस्तु तिलोदकमिति वापीकूपयोस्तु तडागपद्मस्थानेनतत्प्रक्षेपः इदंतु स्तोकतर्प
75 णं बहूनां नसंमतं तर्पणेन यजमानः शुक्लग्रयवश्चापोअस्मानित्यस्यादेवश्रवा आपस्त्रिष्टुप् उदकाङ्जना
र्पणे विः ॐ आपो अस्मान्मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु विश्वं हि रिप्रं प्रवहन्ति देवीरुद
दाभ्यः शुचिरापूतएमि इतिपठन्नीशान्यामुत्तार्य सूयवसादित्यस्यादीर्घतमा गौस्त्रिष्टुप् गोर्जलाङस्था
पने विः ॐ सूयवसाद्भगवती हि इति गां जलान्निष्काश्य ईशान्यां दिशि उत्थाप्यमानायदि सा हिंकरोति॰
तदा हिंकृण्वतीत्यस्यादीर्घतमागौस्त्रिष्टुप्जपे विः ॐ हिंकृण्वती वसु॰ इत्युपविश्य जपेत् ततः शुक्लंत्सका
यौ तेषामसीमविधाय हिरण्यमयपदयिदूर्वाचंदनाक्षतादिभिस्तां गां संपूजयेत् ततो गोः प्रार्थने पुराण ७५

मैत्रैः कुर्यादिति कश्चित् तेन वस्त्रेनाच्छादितो सि त्वं संसारार्णवतारिणी तीर्थं पुण्योदके स्नाता पावयस्व
जलाशयं अर्चितासि स्रग्गंधेन चंदनेनामरार्चिते सत्कीर्ति संहूतिकर्तृ पावयस्व जलाशयं सर्वदेवमयी
यस्मात्पूजनीयासि रोहिणि सर्वकाममङ्गल्ये येनो सर्वपातकनाशिनि सर्वांगैः सर्वभावेन पावयस्व जला
शयं त्वया कृतं पवित्रं त्रैलोक्यं सचराचरं अतो स्माकमिमं येनो पावयस्व जलाशयमिति ततो मुकगोत्रायाऽ
मुकशर्मणे सामगाय ब्राह्मणी यरुद्रदेवत्यामेतां गाममुकगोत्रोऽमुकशर्माहं संप्रददे न ममेति काचन
शृंगीं रौप्यखुरां कांस्यदोहनां ताम्रपृष्ठीं रत्नपुच्छीं वेलकंठीं तां गां शृङ्गपुच्छजलेन पश्चिमकुंडहोत्रे सामः
गाय ब्राह्मणाय दद्यात् श्वेंद्रदाने प्रतिपत्तिरितिनात्र दक्षिणा ततो वाद्यादिघोषे जायमाने हरिद्राकुंकुः
मादिरंजितेन त्रिहस्तामेगलसूत्रेण जलाशयं वेष्टयेत् उत्सर्गानंतरं सूत्रं वेष्टनमित्यन्ये ततो यजमानो न्न
तनेष्ठितो स्तीषे शिरस्सिवथाजलोतिक उपविशेदिति भविष्योत्तरे ततआचार्यो वेदीतः पूर्वोक्तोकूर्मम

करादियुतो हेमरजतमुक्तागारुत्मप्रवालरूप्यपञ्चरत्नयुतो महानदीजलयुतो महानदीजलं दध्यक्ष
ताड॰ तादिभूषितो उदङ्मुखैस्सर्वैरभिहोतृभिष्टैतो सुवर्णपात्रीमादाय स्वयं प्राङ्मुखो जले स्थित्वा सौवर्णं कूर्ममक
७९ रावगाधे जले पूर्वाग्नेयदिशोः पश्चिमाभिमुखो क्षिपेत् राजतौ मत्स्यडुण्डुभावुदङ्मुखो दक्षिणापश्चिम
76 योर्दिशोः ताम्रमयौ कुलीरमण्डूकौ पूर्वाभिमुखो वायव्यदिशि आयसं शिशुमारं दक्षिणाभिमुख उ
त्तरदिशि क्षिपेत् ततस्सऋत्विगाचार्य उदङ्मुखो भूत्वा गाधे जले तां पात्रीमाथर्वणेन शान्त्रोदकेनोप
सामृविगीतेनारण्यगानसाम्ना: पुनर्मामैत्विन्द्रियं पुनरायुः पुनर्भगः पुनर्द्रविणमैतु मा पुनर्ब्राह्म
णमैतु मा इति मन्त्रेण आपोहिष्ठेति तृचेन सूक्तं कुर्यात् पात्रीस्थपदार्थान् जले प्रक्षिप्य तामादाय मण्ड
पे गच्छेयुः सर्वे आचार्यादयो वासांसि परिधाय हविःशेषमेयुः ततो यजमानः स्वासीनमाचार्याय प्रयच्छे
दित्यसीषवं यपदे ततो यजमानो जलाशयान्तिके प्राङ्मुख उपविश्य मङ्गलवाद्यादिघोषे जायमाने ज ७९

एवंजलेजलं ~~पर~~ त्रिः प्रा‍श्य जयेज लमातरः लोक्याः कर्म कराः सर्वे
कुर्वन्तु नित्यपूजये दिने भविष्ये

लाशयोत्सर्गं कुर्यात् स्वपनारायणादयस्तु कूर्मादिप्रदीपकाले उत्सर्गस्ततः प्राचीन्युदीचीकरणमित्या
ह उत्सर्गवाक्यं तु कुशयवजलान्यादाय देशकालौ स्मृत्वा सर्वपापक्षयपूर्वकरुद्रालयगमनानेककं
ल्पावच्छिन्नस्वर्गलोकहर्षपरार्द्धद्वयावच्छिन्नमहस्तपःप्रभृतिलोकागमनासहितभोगपूर्णागमनासहि
तपरमविस्तृपदप्राप्तिकामोऽमुं तडागादिजलाशयं वरुणदेवताकं स्नानपानावगाहनार्थं महे सहि
र्वभूतेभ्य उत्सृजे नमम इति जलाशयं पयप्रजलमुत्सृजेत् प्रागुक्तार्थवादस्यातिवापफलानुदेश्यानि
त्यनो मन्त्रद्वयं पठेत् ॐ सर्वभूतेभ्य उत्सृष्टं मयैतज्जलमूर्जितं रमन्तु सर्वभूतानि स्नानपानावगाहनैः
सामान्यं सर्वभूतेभ्यो मया दत्तमिदं जलं रमन्तु सर्वभूतानि स्नानपानावगाहनैः तथा सोपानात्पति
तः स्नाता जलेष्वेव निमज्जनात् मरणे वास्थिभङ्गे वकर्तादोषैर्न लिप्यते पुष्करिण्यां मृतः कश्चिदस्थि
भङ्गश्च वा भवेत् आत्मघाती वयस्तत्र कर्त्तादोषैर्न लिप्यते ततश्चाचार्याय गोयुग्मदक्षिणादिभिः सम्भा

पूजयित्वाह दस्यांसु वालिन्दधात्समन्ततः ३ निर्मूलवचनं

सदो विप्रान्भ्यर्च्य इंद्रस्कंध महसादीम् इत्यादि प्रागुक्त दिक्पालमंत्रैः प्राच्यादिदिक्क्रमेणेंद्रादिभ्यो
नाग. माषभक्तबलीन्मंत्रैर्दद्यात् अथ सदाचारप्राप्तो नागयष्ट्यारोपणविधिः तत्राचार्येण तत्वासुकितक्षक
७८ कर्कोटकपद्मशंखमहापद्मकुलिकानां नागानां नामानि नूतनपत्राष्टके लिखित्वा शुद्धभूमौ यवोप
रिस्थापितं गंधाद्यर्चितं नूतनकलशे प्रक्षिप्यालोड्यैकं नूतनपत्रमाकृष्य तत्र लिखितनाम्ना नागं
तीर्थजलयात्रायां पक्ष्यामस्तकनागं इहागच्छ इह तिष्ठ इत्यावाह्य तेन नागेनास्य जलाशयस्य रक्षा कार्ये
ति सदस्यान् श्रावयित्वा तन्नागमस्तकनागाय नमः इति पाद्यादिगंधपुष्पधूपचारैः पूजयेत् ततो जलाश
याल्पत्वमहत्वानुसारेण द्वादशपंचदशविंशत्यन्यतमारत्निमितायज्ञियकाष्ठकृतां यष्टिं पश्चिमतो
जलांतिके प्रागग्रामासने संस्थाप्य ॐ नागयष्ट्यै नमः इति पाद्याद्युपचारैः संपूज्य पुष्पवेदनादिभिरलंकृ
त्य तदीयवर्तुलमस्तकोपरि मूले लौहमयवक्रमारोपयेत् ॐ चक्रं सुदर्शनाख्यं तेन नागदंडशिरोगतं ७८

अत्रविघ्नस्यकर्त्तारंजहि डुंहुंहरिप्रियइति ततःसर्वौषधीर्यजमानस्तोयपृष्टिंस्कंधेकृत्वावाद्यवेदध्वनिगाय
मानेजलाशयंप्रदक्षिणीकृत्यजलमध्येप्रागेवपश्चार्थंकृतत्वात्तत्समीपेनयेत् तत्रहरितत्तृणगोमय
यदधिमध्वक्षतकुशमहानदीजलंपंचरत्नानिनिक्षिपेत् ततः ॐ प्रवायो प्रवाहपृथिवीत्वेनत्वाक्षेप
ष्टिंनित्वेनेतद्दृढतया इदंचयस्यारोपणंकूपवाप्योर्न्नकार्यमाचारादेव अथयजमानोगंगादितीर्थज
लानिजलाशयेप्रक्षिप्यतत्समीपेप्राङ्मुखउपविश्यपठेत् कुरुक्षेत्रंगयांगंगांप्रभासःपुष्करंतथा ए
तानिसर्वतीर्थानितडागेनिवसंतुमे दशार्णांमरुजांसिंधुस्यावर्मांडव्यहती एतानिपंचतीर्थानि वित
स्ताकौशिकीसिंधुःशारदासरस्वती एतानियमुनानर्मदारेवाचंद्रभागावदेविका एतानि· गोमती
वाड॰ मतीशाणगंडकीसागरस्तथा एतानि · इतिपठित्वा ततः प्रपद्येवरुणंदेवमंभसांपतिमूर्जि
तं पावितंदेहिमेशुभंसर्वपापमन्नतये सान्निध्यमत्रतोयेस्कृत्वेशामदत्रग्रहान् रुद्रान्नपद्येवरदा·

स्त्वां न स्पृषदस्त्वहे शामयंत्पश्रमेपापं रदंतत्स्ते त्तमां सदा आपः पुण्याः पवित्राश्च प्राणिनां प्राणदास्तथा
ना० शमयंत्वश्रमेपापं तस्माद्वंदे त्तु सर्वदा इति नमस्कृत्य ॐ ह्रियै नमः श्रियै नमः पुष्ट्यै नमः मेधायै विश्वा
७८ यै लक्ष्म्यै नमः इति जलमातृजले रक्तवस्त्रसूत्रं तंडुलपुंजेषु वारुणेत्यादिना पूजयेदिति कश्चित् तत्र मूल
78 मृग्यं ततः आपो हि ष्ठा मयोभुव इति त्र्यचं पठन् यजमानो विच्छिन्नगोगण्या रज्ज्या जलाशयं त्रिः प्रदक्षि
णीकुर्यात् गीतवाद्यादिघोषे जायमाने ततो दक्षिणादिना संतोषितेन विद्वद्ब्राह्मणेन यथेष्टं डंगं पापयेत्
तत उत्सर्गदिनानंतरेषु त्रिषु दिनेषु गुरुर्वेदिस्थापितदेवान् पंचोपचारैः पूजयेत् वरुणादि विश्वकर्म
पर्यंतेभ्यो होमश्च ऋग्भिः स्वस्वकुंडे प्रत्यहं कार्यः एवमुत्सर्गदिने न सह चतुर्षु दिनेषु कृतावत् तुर्य
दिने होमानंतरं विरूढिमद्दिष्ट होमद्रव्येण स्विष्टकृत् हुत्वा ब्रह्मणे पूर्णपात्रं हिरण्यादि दक्षिणां यज
मानेन दापयित्वा ऋत्विजो यजमानान्वारब्धाः स्वस्वकुंडे मूर्द्धाने दिवश्च इत्यादि स्वस्वशाखीय मंत्रैः ७८

क्रमेणाष्टाणाहुतीः कुर्युः अयं सुखः पक्षः अनवकाशे तायदि न एव पूर्णाहुतिरिति कश्चित् तत
श्चेदनादिना वह्नीन्प्रज्वाल्य भस्मनाऽऽयुष्करणमात्मनो यजमानस्य च कुर्युः तत्र यजमानस्यायुष्करणेत
नैय्यम्बक आयुषमिति मन्त्रोहः ततः प्रणीताभोद्वाहियथास्वप्रणवेसर्वैककर्मशेषं समापयेयुः अथ पौराणि
केवलत्वपूर्तकर्म तत्र वत्सरार्थे दिने श्रेयस्यादि अमुकं जलाशयोत्सर्गयज्ञांगभूतं वत्सरार्थीकमेकत्र ममक गो
त्र ममक शर्माणमाचार्यत्वामेभिर्वस्त्रतांबूलादिभिर्वृणे इत्याचार्यं वृणुयाद्यजमानः वृतोऽस्मीत्या
चार्यः यथाविहितं कर्म कुर्विति यजमानः करवाणीत्याचार्यः ब्रह्मवरणं त्वाचार्यः एवाग्निस्थापनो
त्तरं कुर्यात् एवमाचार्यवरणमिहहस्तेनारायणादिभिः पृथगुक्तं सांगकर्मार्थं तेन प्राग्वृतं एव कु
र्यादिति तदुक्तं भाति ततश्चाचार्यः ॐ यद्देवादेवहेलनमिति दर्भैः भूमिं परिसमुह्य ॐ मानस्तोक इ
ति गोमयेनोपलिप्य ॐ त्वांहत्ते षिंद्रे त्युल्लिख्य ॐ सेदसस्पतिमद्भुतमित्यनामिकया रेखाभ्य दद्भ्युद्धृत्य ॐ

त्वामिद्धि हवामहे इति जलेनाभ्युक्ष्य ओं अग्निर्मूर्द्धा दिव इति वारुणमग्निं प्रतिष्ठापयेत् अथ जलाप्लायो
नाड़: त्सर्गांगभूतचतुर्थीकर्मणि कृताकृतावेक्षणार्थं ममुकगोत्रममुकशाखाध्यायिनममुकशर्माणं
७५ ब्राह्मणमेभिश्चंदनाक्षतपुष्पताम्बूलवासोभिस्त्वामहं वृणे इति ब्रह्माणं कृत्वा वृतोस्मीति तेनोक्ते ओं हि
75 स्रार्भ इति दक्षिणतो ब्रह्मासनमास्तीर्य ब्रह्मयज्ञानमिति ब्रह्माणमुपवेश्य आपो हि ष्ठेति सजलं मृन्म
यं प्रणीतापात्रं कुशेषु निधाय आजिघ्र कलशमिति ईशान्ये सजलं कलशं निधाय तत्र वरुणं संपू
जयेत् कया नश्चित्र इत्यग्निं परिस्तीर्य गायत्रेण त्वा छन्दसा सादयामिति अर्घ्यवदासाद्य विष्णोरराट
मसीति पवित्रच्छेदनं कृत्वा प्रोक्षणीरासादयेति प्रोक्षणीपात्रे प्रणीतोदकं कृत्वा त्वायवामहस्ले कृत्वा
दिंगनानि कृत्वार्घ्यवत्प्रोदकस्थाल्यामाज्यमासिच्य इषे त्वेति सपिस्त्रिते ऊर्जे त्वेति सवेदाग्निं दूतं पुरोधय इति पर्यग्नि
कृत्वा व्रातात्रमिदमिति स्रुवं प्रतप्य संनिशितोसीति संमार्गकुशैः संमृज्य प्रत्युष्टं रक्ष इति पुनः प्रता। ७५

वर्हिषि निधायोत्तिष्ठब्रह्मणस्पत इत्याज्यमवतीयेसवितुस्त्वेत्युत्पूयोर्जौतवेदसप्रोक्षणीश्चपूर्ववदुत्पूय
पस्पास्त्वेवोरस्त्रासमित्युपयमनकुशानादायसमिधाग्निमितिसमिधोभ्याधाय विष्वतस्पस्त्वरित्यग्निसंदी
प्य तदेवाग्निस्तदायुरित्यग्निंसंपूज्य देवसवितःप्रसुवेतिप्रोक्षणीपात्रेपवित्रेधृत्वादक्षिणंजान्वासंपात्य
जुहुयात् मनसा ॐप्रजापतयेस्वाहेतिसेततमर्जुंपूर्वाघारमग्नावुत्तरतोजुहुयात् इदंप्रजापतयेनममे
तियजमानेनत्यागःकार्यः एवमुत्तरत्र ॐइंद्रायस्वाहेतिपूर्ववदुत्तराघारंदक्षिणतः ॐअग्नयेस्वाहा ॐ
सोमायस्वा· ॐभूःस्वा· ॐभुवःस्वा· ॐस्वःस्वा· तत्रोग्रये सतत्रोग्रये· ग्नयाग्ने· येतेशते· उडनमसि
तिप्रायश्चित्ताहुतीर्हुत्वा ॐप्रजापतयेस्वाहेतिजुहुयात् ततःपूर्ववत्तिसृभिर्व्याहृतिभिर्मनसाग्निंहु
त्वाप्रणवादिनाहुंफट्कारान्तेनइममेववरुणेतिवारुणमेत्रेणतोयमभिमंत्र्यतेनाग्निमभ्युक्ष्यगायत्र्यास
वित्रेपवदशाहुतीर्जुहुयात् ततः इमंमेवरुणेतिशतमाज्याहुतीर्जुहुयात् ततोव्याहृतिभिर्वेस्त्वाभि

राहुतित्रयं हुत्वा ॐ अग्नये स्विष्टकृते स्वाहेति जुहुयात् एतदनंतरं दानदर्पणे वरुणस्नपनमुक्तं तद्यथा
नाट्र. आदौ दध्यक्षतकुशाग्रक्षीरदूर्वामधुयवश्वेतसर्षपफलसहितेन ताम्रादिपात्रेणाष्टांगमर्घ्यं दत्वा इह
८० तावसीति गजदंतेनाहृतं अश्वस्थान॰ वल्मीक॰ वराहोत्खात॰ अग्न्यगार॰ तीर्थ ह्रद॰ संगम॰ गोष्ठानां न
80 वमृदो नवकुंभेषु क्षिप्त्वा शंनो देवी आपो हिष्ठेति तत्र जलं प्रक्षिप्य ताभिरेव मंत्रैर्वरुणं स्नपयेत् अथ पंचग
व्यस्नाने तत्र सावित्र्यैकपलं गोमूत्रं गंधद्वारामिति पुरीषाष्टमितं गोमयं आप्यायस्वेति पलत्रयं क्षीरं दधि
क्राव्णा इति द्विपलं दधि तेजोसीत्येकपलं घृतं देवस्यत्वेत्येकपलं कुशोदकं गृहीत्वा सर्वमेकीकृत्य ते
नापो हिष्ठेति तडागादिवारिणा वरुणं स्नपयेत् ततः केवलदध्ना दधिक्राव्णा इति स्नपयेत् आप्यायस्वे
ति क्षीरेण तेजोसीति घृतेन मधुवातेति त्रयेण मधुना सरस्वत्यै भैषज्येनेति पुष्पोदकेन हिरण्याद
सवितेति रत्नोदकेन देवस्यत्वेति कुशोदकेन अग्न आयाहीति फलोदकेन सावित्र्या गंधेनोदकेन ८

स्नपयेत् ततो घटानां सहस्रेण पंचशतासार्द्धेद्विशत्याष्टोत्तरशतेन वा ततः षष्ट्या द्वात्रिंशता षोडशके
नत्वष्टयेन वा शंख्यां स्नपयेत् शंख्यां सुवर्णरजतताम्रकांस्यपैत्तलमृन्मयैः कलशैः ततः सहदेवी
वचा· ब्राह्मी· बला· अतिबला· पृंविपुच्छी· सिंही· सुवर्चला· इत्येतैर्महौषधियुतजलकलशेन
स्नपयेत् ततो यवगोधूमनीवारतिलश्यामाकशालिप्रियंगुव्रीहिबीजाष्टकयुतकलशेन ततो गो
मयेन मृदा वा कृतैः स्वस्तिकपद्मशंखोत्पलकलशश्रीवत्सदर्पणनंद्यावर्तकैः पंचवर्णोदनैः
पंचवर्णरजोभिर्दूर्वाक्षतभक्तिबलिभिश्च वहणं नीराज्य वर्णयेत् तदाचनीयेनम इति गांगेजलं
दत्वा वेदस्तत्रसमाप्तके यज्ञपात्रसमन्विते सर्ववर्णप्रभेदेववाससीनवनिर्मिते इति वस्त्रयु
गं दत्वा समाभागकर्पूरकुंकुमान्विते। सर्ववर्णप्रभेदेववाससीनवनिर्मिते वंदन शरीरं
तेन जानामि वेष्टं नैव वनैव च मया निवेदितं भक्त्या प्रतिगृह्य विलिप्यतामिति दत्वा तुलसी

नाउ॰ पुष्पमालोच तेस्तथैवेंद्रज्योतिषिं विदमुदग्निस्तथैवच तमेवसर्वेज्योतीषिदीपोयेप्रतिष्ठन्तामि
८१ तिवत्वा विंशदीपान्दत्वाप्रदक्षिणीकृत्यवनस्पतिरसइतिधूपंदीपंवदत्वाशान्त्यालंकारमहाभूषा॰
यतेनमइतिदद्यादिति अत्रप्रमाणंमृग्यं ततःसंस्त्रवप्राशनादिकृत्वाइमंमेवरुणेतियजमानान्वा
81 रच्याःपूर्णाहुतिंहुत्वा अग्निंपूंप्रेज्यत्र्यायुषंजमदग्नेरित्यात्मनोयजमानस्यचत्र्यायुषंकृत्वाग्निंसंस्थ
ज्यपनत्वाऽग्नेक्षमस्वेतिविसर्जयेत् ततोयजमानोगुर्वर्त्विग्भ्योगोसुवर्णादिदक्षिणांप्रत्येकंदद्या
त् गुरवेद्विगुणं तद्यथा अद्येत्यादिकृतैतदमुकजलाशयोत्सर्गयज्ञांगभूतवत्तत्थीकर्मप्रति॰
ष्ठार्थममुकशर्मणेगुरवेऽमुकगोत्रोमुकशर्माहमिदंसुवर्णमग्निदैवतंदक्षिणांसंप्रददेनमम
तिकुशाक्षतजलैर्दद्यात् ओंस्वस्तीतिसवदेत् ततःऋत्विग्भ्योन्येभ्यश्चब्राह्मणेभ्योदक्षिणांदद्यात्
शक्त्यापूर्ववत् ततःसऋत्विगाचार्योवैदिकैःसुरातामित्यादिपौराणैश्चपूर्वोक्तमंत्रैः कलशोदके ८१

न यजमानमभिषिंच्य स यजमानो ग्निप्रादक्षिण्येन वेदिं गत्वा ओं सूर्याय नमः इत्यादिक्रमेण पाद्यादिभिः
सूर्यादीन्संपूज्य प्रणमेत् तमस्तोत्विवरुणेनार्घ्य यांतुदेवगणा इति सर्वान्विसर्जयेत् एवं कर्मसमा
प्यवरुणेस्मरन्यस्तपात्राणि यज्ञोपकरणानि वायमेषा त्वत्वा यत्त्वेति स्वयमेव विभज्य ऋत्विग्भ्यो दद्यात्
न गुरवे मंडपस्थं सगुरुभ्य स्तेभ्यो विभज्य देयः कूर्मादिस्थापनार्थां हेमपात्रीं त्वाचार्यायैव दद्यात् ते
तेषां दाने संकल्पवाक्यप्रतिपन्नित्वात् ततो नवग्रहप्रीतये स्वर्णं शक्त्या ज्योतिर्विदे देयमिति रूपनारा
यणः ततः सोपस्करां शय्यां गुरवे संकल्पपूर्वकं दद्यात् अन्यदपि दानमसंकल्पितमिष्टं वस्तु दद्यात् त
तः सोपस्करां शय्यां गुरवे सहस्रमष्टोत्तरशतं पंचाशद्विंशतिर्वा ब्राह्मणान् शक्त्या तद्देवकालांतरे वा सं
कल्पपूर्वकं यथोपपन्नेनान्नेन भोजयेत् तत आशिषो गृहीत्वावधापनादि मांगलिकं निर्वर्त्य दीना
नाथादिभ्यो यथाशक्ति भूयसीं दत्वा स्वस्थः संतुष्टः सह भुंजीतेति एष मुख्यः कल्पः अशक्तौ समद

ता॰ड॰ प्राभिस्त्रयोदशभिर्वाचार्यश्चर्त्विग्भिः कुर्यात् तत्राप्यशक्तावेकाग्निविधानेन त्र्यृत्विग्भिर्विनाचार्येणैकेन
कुर्यात् प्रासादप्रतिष्ठायामप्येषएव मत्स्यपुराणोक्तस्तडागप्रतिष्ठाविधिर्ज्ञेयः किंतु तत्र प्रासाददेव
८२ तोद्यापयेतोजापकाञ्जपेरन् वारुणहोमस्थाने प्रासाददेवताभ्यो होमः गोरुत्तारणं नास्ति प्रतिष्ठेयज
लाभावात् सौवर्णमत्स्यादिस्तुत पात्रीजलश्चतयोनागयष्ट्यारोपणं च न कार्यं शिष्टैरनाचरणादित्येवं
वास्तुपूजावप्रथमं कार्या नारायणस्तोयवसतारामेश्वरभट्टसूनुनाभिनवा नारायणभट्टकृतिनाज
लाश्रयोत्सर्गपद्धतीरविता १ यन्मयाप्यद्यतिगहनेस्खलनं तु संतानकल्पभवेत् विबुधवरैरिति मत्वाद
तव्यावेदहकिरिह २ इति श्रीमद्रामेश्वरभट्टसूरिसूनुनारायणभट्टकृते जलाशयोत्सर्गविधौ तडागो
त्सर्गविधिपद्धतिः संपूर्णसमाप्तम् ॥ शुभं हरि ॐ संवत् १९ ४४ पौषशुक्लपक्षेतृतीयायां
लिख्यते ॥ श्रीरामजीसाहाई ॥ ८२